रस्याच्च। अभिन्ने ति चेत्तर्हि चरमघटस्मरणात्पटसंस्कारनाशापत्तिः अथ तत्तत्प्रकारकतत्तद्विशेष्यकसंस्कारनाशं प्रति तथाविधविजाती
यस्मृतित्वेन विषयमिश्रितकार्यकारणभावोपगमान्नैयमापत्तिरिति वस्तुतस्तत्प्रधापकतासंबंधेन विजातीयस्मृतिविशिष्टत्वस्य संस्कारितिवि
ष्टतयोक्तापत्तिशंकैव नेति चेदेवमपि घटपटोभयगोचरस्यादृशस्मरणोत्तरमेकस्य स्मृतिर्जाता जात्वपि नान्यस्य तादृशस्मरणे नोभयसंस्कार
नाशापत्तिरितिरस्तं। विषयभेदभिन्नत्वस्युक्तरीत्याऽसांकर्यात्‌। न च यादृशविष्टपविशेषचरमस्मृतिस्समूहालंबनरूपैव तत्र सांकर्यं दुर्वा।
मिति वाच्यं। तादृशविषयमानाभावात्‌ तस्यास्तद्व्यक्तित्वेन हेतुतामुपेत्य वैजात्यस्य तद्व्यावृत्ततयाः सांकर्योद्धरनच चरमत्वेनैव हेतुत्वोप
पत्तौ वैजात्ये मानाभाव इति वाच्यं। तस्य दुर्वचत्वात्‌ विजातीयस्मृतिविशिष्टेति कालादिजन्यसंस्कारनाशे व्यभिचारवारणायेदं संस्कार
विशेषणं न तु विजातीयस्मृत्युपधायकत्वनिवेशेप्युक्तव्यभिचारवारणं संभवत्येवेत्यत आह अत एवेति विजातीयस्मृतिजन्येति कालोपा
धिविधया विजातीयस्मृतिजन्येत्यर्थः। यथाश्रुते तु अनुभवत्वेन हेतुत्वे स्मृतेः संस्कारजनकत्वाभावेनासंगत्यापत्तेः तद्विशिष्टत्वाभावादिति त
थाचानुभवजन्यविजातीयस्मृत्यव्यवहितोत्तरसंस्कारस्य न क्षणिकतापत्तिः तदानीं तादृशस्मृतिविशिष्टसंस्कारस्यासत्त्वेन कार्यतावच्छेदका
नाक्रांततया तन्नाशायादृष्टासंभवादिति भावः उक्तस्येव उपधायकतासंबंधेन विजातीयस्मृतिविशिष्टत्वस्यैव अननिप्रसक्तत्वात्‌ विजातीय
स्मृतिजन्यसंस्कारव्यावृत्तत्वात्‌। पद्मा तत्र ज्ञानत्वेन हेतुत्वादिनापि स्मृतिजन्यसंस्कारस्य क्षणिकत्ववारणापलाघवेनेदृशरीतिरेव संमुचि

३/१२

येपि तादृशस्मृत्यात्तथाविधसंस्कारनाशसंभवादिति चेन्न। तत्र तदुत्तरभावीतरस्मरणाभावकालीनपरस्मरणस्यैव कालविशेषस्यैव वा
पठसंस्कारनाशकत्वादित्याहुः। अन्ये तु सामान्यतः प्रतियोगिता संबंधेन संस्कारनाशं प्रति स्वसामानाधिकरण्य स्वावृत्तिविषयताश्रयत्वोभ
यसंबंधेन स्मृतित्वेनैव हेतुत्वमनेनोपस्थितविषयकस्मरणात्संस्कारनाशापत्तिरित्याहुरित्यादिको। अनाशेति प्रथमस्यैव द्वितीयस्याप्यसमाना
कारत्वादिति भावः। कारणं तदादेरेवेति कालादेरेव। इत्यर्थः। इदं चनाशेन्विति नाशकत्वमिति तादृशसंस्कारस्यैवानुपपद्यते। तस्य नाशकत्वं च प्र
तियोगितया नाशकत्वकल्पने फलनाशकत्वकल्पने। चरमफलमिति यदुत्तरं न समानविषयकस्मरणं तदन्ता दृशाचरमस्मृतेरेव तद्व्यक्तित्वेन स्म
रकसंस्कारनाशकतास्वीक्रियते न तु प्राथमिकादिस्मृतीनां तथा चानुभवत्वेन स्मृतिहेतुत्वेपि स्मरणोत्तरमस्मरणप्रसंगाभाव इति भा
वः। लाघवमभिप्रेत्याह। वस्तुतस्त्विति। कालादेरेवेति स्वकारणस्मृतेर्व्यवच्छेदः। नाशकत्वं। स्मृत्यजनकसंस्कारनाशकत्वं अनन्यगतिकत्वा
त्। अनुगतजनकाभावेन स्मृतेर्व्यवच्छेदकासंभवात्। स्मृतौ तु तदाकारसंस्कारजन्यस्मृतौ तु संस्कारेति तदाकारसंस्कारेत्यर्थ एकजातिरेवेति। एवका
रेण तत्तद्व्यक्तित्वस्य समानाकारत्वस्य च व्यवच्छेदः। चरमेति। एकाकारतत्तत्संस्कारजन्यस्मृतिपृथा चरमस्मृतिस्तन्मात्रवृत्तिरित्यर्थः। कल्प्यत इ
ति समूहालंबनभिन्नतदाकारचरमस्मृतेरेव नाशकत्वाभ्युपगमाच्च न सांकर्यमिति तु ध्येयं। एतेन तादृशजातिविषयभेदेन भिन्ना न वा भिन्ना चे
त्तर्हि तासां संकरप्रसंगः एकैकगोचरसंस्कारनाशकस्मृतौ परस्परपरिहारेण वर्तमानत्वात् नानासंस्कारनाशकसमूहालंबनस्मृतौ सामानाधिक
समूहालंबनसंस्कारस्यत्वे समानाकारस्यापि परमफलस्यैव नाशकत्वमित्याशयः। अत्र

२०७

तान तु तत्स्मृतिजनकत्वस्य नाश्यतायां प्रत्यासत्तित्वमित्यावयोरेतद्दृशो साम्यमिसाद्भ्यान्नासंगतिः। जायते चेतीत्यत्र तु एतावता स्मृतेः संस्कार
जनकत्वसिद्धावपि स्मृतिजनकत्वप्राप्तिः एवमुक्तावतारणमप्यसत्। संस्कारस्य चरमफलपर्यंतस्थायित्वे मध्ये स्मरणापत्तिः। न चोद्बोधकाभा ७।
वान्न तथेति वाच्यम्। अनुगतोद्बोधकस्य त्वेनासंभवादिति तन्न स्मृतेः संस्कारजनकत्वसिद्धावेव स्मृतिजनकत्वस्याप्यर्थसिद्धत्वात्। अनु
पदमेवैतद्व्यक्तौ भविष्यति। अनुगतोद्बोधकस्य त्वे मध्ये स्मरणस्येष्टत्वाच्च। अन्यथा सर्वमतेऽप्रतीकारात्। अत्र नव्याः संस्कारनाशकविजा
तीयस्मृतिः क्वकदावेत्यत्रानुगतनियामकाभावेनेदृशवैजात्यस्यांगीकर्तुम। नौ चित्यान्नेत्यभवतारणीयं परं तु न ननु स्मरणस्य संस्कारनाशक
त्वमेवाप्रामाणिकं स्मरणांतरमपि न तज्जन्यसंस्कारेण स्मरणजननात् प्राचीनसंस्कारसत्त्वे क्षतिविरहात्। न चैतादृशसंस्कारस्य मुक्तिपर्यंत
मवस्थानप्रसंगः दृष्टत्वात्। तथा चानुभवत्वेन स्मृतिहेतुत्वे बाधकाभावान्मातिव्याप्तिरत आह जायते चेति। त्याहुः स्मृत्यनुव्यवसायजन्य
संस्कारादेव स्मरणोत्तरस्मरणमत आह जायते चेति। तस्याहुः। पुनःपुनः स्मरणसमानविषयस्मरणोत्तरस्मरणं। अत्र स्मरणत्वमविव
क्षितं पुनःपुनरनुभवादपि तादृशदर्शनात्। एतेन पुनःपुनः स्मरणत्वंस्य। जन्यसंस्कारप्रयोज्यत्वसंबंधेन स्मृतिविशिष्टस्मृतित्वमित्यपास्तं स्मृ
तित्वाविवक्षणे पुनःपुनरनुभवासाधारण्यात्। तथा च तादृशस्मरणजन्यदृष्टतरसंस्कारितज्जन्यरूढिति स्मरणे च व्यभिचारान्नानुभव
त्वेन स्मृतिसंस्कारोत्पत्तिहेतुतासंभव इति भावः। तत्रेत्यादि। तथा च संस्कारसमवायान्यतरसंबंधेनैव कारणत्वमिति भावः। अत एव पूर्व

स्मरणस्यासंस्कारद्वापूर्वरादृढतरसंस्कारहेतुत्वादेवनत्तत्स्मृतीनामीयीति अपिर्भिन्नक्रमत्वेनेत्यनेनान्वितः नेनतत्वेनायीतिफलितं। अ
पिनासामान्यहेतुत्वसंग्रहः अत्र तत्तत्स्मृतीनामिति तदनुभवव्यक्तीनामप्युपलक्षकं पुनः पुनरनुभवस्यालानुरोधात्। एतेन नादृशसंस्का
रं प्रति यथासमानविषयकस्मरणोत्तरस्मरणत्वादिनानहेतुता पुनः पुनरनुभवादपि दार्ढ्यदर्शनात् तथानसमानविषयकज्ञानोत्तरज्ञा
नत्वादिनापि उपेक्षोत्तरोऽन्यन्नोपेक्षातोपि दृढतरतादृशसंस्कारायत्तेः रोगादिनाज्ञानार्थगोचरसंस्कारनाशोत्तरजातज्ञानात्तदापत्तेश्चे
तिपरास्तं उक्तानुपपत्त्यानोक्तरीत्याजनकत्वं किंतु समानविषयकसंस्कारत्वेन दृढसंस्कारं प्रति दृढदृढतरादित्तदृशसंस्कारत्वेन
च दृढतरदृढतमसंस्कारं प्रतिजनकता अतएव भावनायाः पटुतरभावनाजनकताप्रवादइत्याहुः तच्चिंत्यं। उक्तरीत्योक्तानुपपत्त्य
भावात् जातिविशेष इति तथाच पुनः पुनः स्मरणत्वं जातिरेव क्लृप्ताभावः कश्चिदिति अस्वरसबीजं च तादृशजातेरनुभवत्वादिना सांक
र्येण पुनः पुनः ऽनुभवासाधारण्यं जातिरूपकल्पनेतादृशजात्यवच्छिन्ने ऽनुगतनियामकाभावेन दृशजातौ मानाभावो गौरवं चेति
। नादृश इति। दृढतरत्वे स्यर्थः। अत्र वदन्ति। ज्ञानत्वेन स्मृतिसंस्कारहेतुत्वे युक्तं परमप्याहुपरिस्थ्यं चेति उक्तरीत्यावतारणं तु न सम्यक्
पादृशसंबंधिविशेषज्ञानसत्वे पुनः पुनः स्मरणोत्तरं नियमतः स्मृतिर्न त्वनुभवमात्रोत्तरं तादृशोद्बोधकघटितसामग्र्या अननुगमात्सं हेरंब
स्कारगतजातिविशेषस्यावश्यकत्वात् झटिति स्मृतेर्दृढत्युद्बोधकसमवधानाधीनत्वमुपगम्य संस्कारातिशयखंडनेशास्मादावभ्या

सोपिनोपयुज्यतेतिदीधितौअन्यत्रापित्रविशेषरूपेणसामान्यरूपेणहेतुतासंभवस्तादृशस्थलांतरेपि।तथाचसंयोगेद्रव्यत्वेनहेतुत्वंननुसत्वे
नपृथिवीत्वादिनावासंदिग्धव्यभिचारत्वात्‌एवंविशिष्टबुद्धौविशेषणज्ञानत्वादिनानतुस्वतंत्रविशेषणज्ञानत्वादिनासंदिग्धव्यभिचार
त्वादितिभावः।व्याख्यायांविशिष्टानुभवत्वमितिविशिष्टज्ञानत्वस्यस्मृतौसंदिग्धव्यभिचारकत्वादितिभावः।अथसिद्धांतःसंस्कारस्यस्मृति
जन्यत्वेऽपसिद्धांतःतत्कृतस्वानंतरोत्पन्नविशेषणगुणमुद्दयानत्कृतःतद्वृत्तीनामितिस्वजन्यसंस्कारनाश्यानामितिभावः।दीधितौअसह
भावान्युगपदवस्थानासंभवात्पूर्वसंस्कारस्यप्राथमिकस्मृत्यानाशेनद्वितीयक्षणेस्मरणानंतरोत्पादस्यासंभवात्तादृशस्मृतिजन्यसंस्कारे
णस्मरणोत्पादृशायांवर्त्तमानस्यजनकस्मृतेर्नाशात्स्मृतिद्वयस्ययुगपदवस्थानंसंभवतित्रिचतुरादिव्यक्तीनांयुगपदवस्थानंतुसुदूरपराहत
मितिभावः।यत्तुप्राथमिकस्मृत्युत्पत्तिक्षणेविनश्यदवस्थपूर्वसंस्कारसत्वेनतद्द्वितीयक्षणेतेनस्मरणांतरजननेबाधकाभावात्स्मरणद्वयस्ययु
गपदवस्थानंसंभवत्येवेतितदसत्।संस्कारस्याविनश्यदवस्थस्यैवस्मृतिहेतुत्वमित्याशयात्तस्मृत्योरितिविरुद्धयस्मृतीनामित्येवोक्तं।पक्षधर्मताज्ञा
नेत्वेयत्रज्ञानपदस्यानुभवपरसंभवाच्च।तिद्वययुगपदवस्थानसंभवेप्यपेक्षिततत्रिचतुरादिव्यक्तियुगपदवस्थानस्यैवमप्यसंभवाच्च।अतएवस्मृ
त्योरितिविरुद्धयस्मृतीनामित्येवोक्तं।पक्षधर्मताज्ञानेत्वेयत्रज्ञानपदस्यानुभवपरत्वेनदोषवारणासंभवाच्चरमेति।तथाचतादृशज्ञानजन्यानुभ
वत्वमनुमितिलक्षणंतस्यचनविशिष्टस्मरणेऽतिव्याप्तिःअनुभवत्वजातेस्तत्राभावादितिभावः।व्याख्यायांदिवसादिविलंबेद्वितिप्रतिबंध

कसत्वेनाव्यवधानेनानुमित्याद्यसंभवादिति भावः। नन्वेति संशयात्मकस्मृत्यापत्तिरित्यनेनान्वितं। नक्ष्मभिरिति संशयात्मकज्ञानदेककोट्यु
द्बोधकदशायामेककोटिस्मरणस्येष्टत्वेन संशयात्मकस्मरणस्यैवानिष्टतया तद्वारणाय निश्चयत्वं निवेशनीयं तद्वारणं चोपदर्शितप्र
तिबंधकवशादेवेति निश्चयत्वनिवेशप्रयोजनविरहः। तथा च चरमज्ञानपदस्यानुभवपरत्वं विनैवानिव्याप्तिवारणं संभवतीति भावः। नाश्यत
इति। आत्मतत्वसाक्षात्कारस्य मिथ्याज्ञानवासनानाशकत्वानुरोधेन विरोधिविषयकज्ञानस्य संस्कारनाशकतया विभिन्नकालीनतत्तद्भावनि
श्चयजन्यसंस्कारयोर्मिलनासंभवेनैव ताभ्यां न संशयाकारस्मरणसंभव इत्युपदर्शितप्रतिबध्यप्रतिबंधकभावे मानाभाव इत्याशयः। ता
दृशप्रत्यक्षेति विरोधिविषयकज्ञानस्य स्वप्रतिबध्यज्ञानजन्यसंस्कारं प्रत्येव नाशकतायाः सर्वसिद्धत्वेनानुमित्यादेः प्रत्यक्षाविरोधितया
तज्जनितसंस्कारनाशकत्वासंभवादिति भावाः। आहुरित्यास्वरसवीजं च संशयजन्यानंतपदसंस्कारव्यक्तितन्नाशकत्वनामपेक्ष्य संस्कारजन
कतायां निश्चयत्वनिवेशस्यौचित्यं। एवमुक्तरीत्यायं तज्जनकेत्यादिनियमवलादुभयत्र निश्चयत्वप्रवेशस्यावश्यकत्वं च। अत एवात्रयत्केश्चिदुक्तं
वह्निव्याप्यधूमाभावस्मृतिं प्रति तज्ज्ञानहेतुतायां निश्चयत्वनिवेशेनैव वह्निव्याप्यधूमवत्तासंशयात्तत्कोटिकसंशयात्मकस्मरणवारणं संभ
वति संशयस्याभावविषयकतानेयत्यात्। तदंशे निश्चयत्वविरहेण तम्दानासंभवादिति भावकोटिणेचरस्मृतिहेतुतायां निश्चयत्वनि हेरंब
वेशावैकल्यं न च विनिगमनाविरहः। तदभावाप्रकारकत्वरूपभावकोटिनिश्चयत्वापेक्षया तदप्रकारकत्वरूपस्याभावकोटिनिश्चय

त्वापेक्षया तद्प्रकारकत्वरूपस्याभावकोटिकसंशयवारणाय धूमत्वावच्छिन्नप्रकारताशून्यत्व तदभावाभावत्वावच्छिन्नप्रकारताशून्यत्वरू
पद्विविधनिश्चयत्वमेव निवेशनीयं प्रमेयत्वादिना धूमप्रकारकज्ञानसंग्रहाय प्रकारतावच्छेदकनिवेशस्यावश्यकतया धूमप्रकारतात्वेनोभ
यप्रकारतयोरनुगमासंग्रहाय प्रकारतावच्छेदकनिवेशस्यावश्यकत्वाभावात्। धूमवत्ताज्ञाने च तदभावत्वावच्छिन्नप्रकारताशून्यत्वरूपमेकवि
धमेव निश्चयत्वं निवेशनीयमिति विपरीतलाघवमिति चेन्न। धूमाभावाभावत्वेन धूमप्रकारकस्मृतौ तथाविधज्ञानहेतुतायां धूमाभावप्र
कारकत्वनिवेशेनैव तेन रूपेण धूमकोटिकधूमाभावसंशयात्तत्कोटिकसंशयात्मकस्मरणवारणसंभवेन धूमाभावस्मृतौ तज्ज्ञानहेतुतायां धूम
त्वावच्छिन्नप्रकारकत्वमात्रस्यैव निवेशात्। एवं धूमत्वावच्छिन्नप्रकारकज्ञानहेतुतायां निश्चयत्वनिवेशनमनर्थकमेवेत्यतिव्याप्त्यसंगतिरिति
तदपि निरस्तं। अनंतत्वादिनियमवल्लाभत्वापि तन्निवेशस्यावश्यकत्वात्। केचित्तु निश्चयत्वस्य निवेशे तु पक्षात्मकसंशयादेककोट्युद्बोधकदशा
यां तत्स्मरणवारणाय तादृशोपेक्षात्मकसंशयव्यक्तीनां भेदः संस्कारजनकतायां स्मृतिजनकतायामेव निश्चयत्वनिवेशोक्तः किं स्मृतिजनकता
यां निश्चयत्वनिवेशेन। न च विनिगमनाविरहः अनंतसंस्काराकल्पनस्यैव विनिगमकत्वादिति चेन्न तथा सति व्यापारं प्रति येन रूपेण फलं प्रस
पि व्यापारिणस्तेन रूपेण हेतुत्वमिति प्राचीननियमभंगप्रसंगादित्याहुरित्यनेनास्वरसामाहुः। तदसत्। संस्कारानुत्पत्त्यैवेसाध्ववनारणि
कोत्करीत्या संस्कारस्य तत्तद्व्यक्तित्वेन जनकतया निश्चयत्वानिवेशेऽपि तद्व्यक्तीनां भेदस्य संस्कारादिजनकतायां निवेशस्य तद्व्यक्तीनां प्रतिबंध

धकत्वस्य वाऽभावात्। एतेन चरमज्ञानपदस्यानुभवपरत्वाभावेऽपि नोपदर्शितविशिष्टस्मरणे व्याप्तिसंभवस्तत्र निश्चयत्वेनाहेतुत्वात् संस्का
रजनकतायामिव निश्चयत्वस्य निवेशनीयत्वात्। अथ तत्र निश्चयत्वनिवेश एवोचितः। न च विनिगमनाविरहः। उपेक्षास्थले नंतसंस्कारा
कत्वनस्यैव विनिगमकत्वादिति चेन्न। उपेक्षाव्यावृत्ततत्तद्व्यक्तित्वेन ज्ञानस्य संस्कारजनकत्वे वोपेक्षास्थले संस्कारानुत्पत्त्या तज्जनकताया
मुपेक्षान्यत्वाप्रवेशात्। पुण्यनेचैतत्। संस्कारजनकतायां निश्चयत्वानिवेशेऽपि विशिष्टस्मरणेच्छाकालीनविशिष्टस्मृतिसामग्र्या अनुभवंप्रति
प्रतिबंधकतायां संस्कारांशे तदभावाप्रकारकत्वस्य निवेशनीयतया गौरवं। अन्यथा तादृशस्मरणेच्छादशायां संशयजन्यसंस्कारसत्वेऽप्यनुभावा
प्रकारकत्वं निवेश्यते अव्यावर्तकत्वादिति लाघवमित्ययाऽस्तां। लाघवमूलकासंतेत्यादितियमवलात्स्मृतिजनकतायामपि निश्चयत्वनिवेशस्या
वश्यकत्वमिति सम्यक्त्वं। लाघवमूलकास्ये पूर्वमेवावेदनात्। इदं तु बोध्यं चरमज्ञानपदस्यानुभवपरत्वाभावेऽपि न स्मृतावतिव्याप्तिः। अनुभवत्वेनै
व तत्र हेतुत्वात्। न च परिसज्यचेसाद्युक्तदूषणं। तथा सति ज्ञानद्वयादनुमितिसंदेहेन परामर्षत्वस्य गृह्यमाणव्यभिचारकतया निश्चिताव्यभि
चारकेण व्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानत्वेनैवानुमितिहेतुतौचित्यात्। यदि च लाघवसत्वेऽपि गृह्यमाणव्यभिचारकेणापि कारणत्वंक
ल्प्यते लाघवज्ञानस्योत्तेजकस्य सत्वे व्यभिचारशंकाया अविरोधित्वात् प्रकृते चातिप्रसंगवारणाय तत्कालीनतत्पुरुषीयगृह्यमाणव्याप्यत्वच्छेद हेरंब
कज्ञाकाया अविरोधित्वात् प्रकृते चातिप्रसंगवारणाय तत्कालीनतत्पुरुषीयगृह्यमाणव्याप्यत्वच्छेदकजाकपक्षधर्मताज्ञानत्वेन हेतुत्वं वाच्यं त

रूपेक्षया परामर्षत्वेन हेतुतायां लाघवं स्फुटमेवेति भाव्यते नत्वनुभवत्वेन हेतुतायामपि तुल्यं स्मृतिजन्यानंतसंस्काराकल्पनेन लाघवात्। यत्तु परि
त्यज्येत्यादेरयमर्थः। निश्चिताव्यभिचारकं लघुरूपं परित्यज्य गुरुणा गृह्यमाणाव्यभिचारकेणापि परामर्षत्वादिना हेतुत्वं तत्रोक्तरूपापेक्ष/
या लाघवज्ञानस्योत्तेजकस्य सत्वच्च/कारणत्वं तत्कल्प्यते इति परित्यज्येत्यनेन यत्र तादृशरूपांतरं नास्ति तत्र गृह्यमाणाव्यभिचारकेणापि प
रामर्षत्वादिना हेतुत्वं तत्रोक्तरूपापेक्षया लाघवज्ञानस्योत्तेजकस्य सत्वाद्व्यभिचारशंकाया अविरोधित्वादिति ध्वनितं। अत्र नु ज्ञानत्वापेक्षयाऽनु
भवत्वं गुरुतरमेव तस्य जातित्वे मानाभावेन स्मृत्यन्यज्ञानत्वाद्युपाधिरूपत्वात्। न च स्मृतिजन्यातंतसंस्कारकल्पनातः स्मृतिहेतुतावच्छेदकत्वेनै
कजातिकल्पना युक्तेति वाच्यं। संस्कारकल्पनायाः फलमुखत्वेनादोषत्वादिति तदसत्। अक्लृप्तानंतव्यक्तिकल्पनास्थले फलमुखगौरवस्यापि दोष
त्वात्। नाप्यनुभवत्वेनेत्यादिति तदसत्। पूर्वशंकाग्रंथविरोधाच्च। अनुभवत्वस्योपाधित्वरूपत्वे लाघवे न ज्ञानत्वेनैव हेतुतया गौरवेणानुभवत्वेन
हेतुताया असंभवे तद्धेतुताभिप्रायकत्वादस्य ग्रंथस्योत्थानस्यैवासंभवात्। शंकापरिहारयोरेकाभिप्रायकत्वस्य संप्रदायसिद्धत्वेन तयोर्भिन्ना
भिप्रायकत्वे संदर्भविरोधात्। लाघवस्यैव परिहारतया वक्तव्यत्वापाताच्चेति सूक्ष्मदृशावधातव्यं। स्वाव्यवहितेति अत्र व्यापारप्रत्यासन्यव
च्छिन्नहेतुताकस्य स्वाव्यवहितप्राक्कालवृत्तित्वाभावेन तदुक्तिभंग्या व्यापारप्रत्यासत्त्यनवच्छिन्नहेतुत्वविवक्षणे तात्। याथैवमुख्यजनकत्व(
निरूपितत्वात्मकजन्यत्वे) तत्प्रत्यासत्त्यैव तत्र प्रत्यासत्तीति स्वरूप — कथनं घटकत्वसंभवप्रदर्शनाय घटितत्वं तृतीयार्थः। तस्य च जनकतानि

रूपितत्वात्मकजन्यत्वैकदेशाजनकतायामन्वयः तथा च कार्याव्यवहितपूर्वकालवृत्तित्वघटितं जनकत्वं विवक्षितं स्मृतिजनकत्वं तु व्यापारकत्वैका
लवृत्तित्वघटितमिति स्फुटमेव अन्यथा परामर्शस्य समवायप्रत्यासत्त्याहेतुत्वेन यथाश्रुतेऽसंग्याते। सिध्यादीति। एतच्चापरामर्शद्वितीयपक्षेणेत्र
त्यक्षनिर्वाहाय अन्यथाऽभिन्ने विषयेऽनुमितिसामग्र्याबलवत्वेन तदसंभवात् अत्र सिध्यादीत्यस्य सिधिर्विरहवत्त्वस्य सिद्धिसा आदिकाली
नायस्येत्यर्थः। अन्यथाऽनुमितेरसंभवेनाव्याप्त्यसंगतेः। अत एवाह धर्म्यंतर इति। तस्मिन्नेव धर्मिणि प्रत्यक्षेऽनुमितेरसंभवात्। वह्नित्वादीति।
आदिनावह्निपरिग्रहः। नाव्याप्तिः। अन्यथा तज्जन्याजन्यत्वरूपसाक्षात्तज्जन्यत्वलाभविनाव्याप्तिरिति भावः। मत्वेति अत्रापि व्यापारप्रत्यासत्त्यनव
च्छिन्नहेतुताभावे हेतुत्वस्य कार्याव्यवहितपूर्वकालवृत्तित्वघटितत्वाभावे वा तात्पर्यमुक्तयुक्तेः। परे तु स्वाव्यवहितप्राक्कालवृत्तित्वप्रत्यासत्त्ये
ति अत्र परामर्शान्वितत्वे विशिष्टयं जन्यत्वैकदेशाजनकत्वान्वितसामानाधिकरण्यं व्याप्यत्वं वा तृतीयार्थः न तु स्वाव्यवहितत्वादि तथा च स्मृतौ ता
दृशप्रत्यासत्तिविशिष्टपरामर्शस्याहेतुत्वात् स्मृतिहेतुत्वस्य तादृशप्रत्यासत्त्यसमानाधिकरणत्वात्तादृशप्रत्यासत्त्यव्याप्यत्वाद्वा नातिव्याप्तिरिति भावे
इत्येव सम्यगिति वदंति अन्ये तु परामर्शस्य तादात्म्येन हेतुत्वे वृत्तित्वे सत्त्व परामर्शानिष्ठवृत्तित्वविशेषणमाहुः तेन न व्यभिचार इत्याहुः तन्न कस्या
श्चिदित्यादिग्रंथासंगतेः अपरे तु जनकताविशेषसंबंधेन अनुमितौ उक्तप्रत्यासत्त्या परामर्शो हेतुः शेषं पूर्ववदित्याहुः तदपि न कस्याश्चिदित्यादि हेरंब·
ग्रंथविरोधस्य दुर्वारत्वात् वस्तुतस्तु यथा समवायेनानुमितौ समवायेन परामर्शस्यात्मनिष्ठप्रत्यासत्त्याहेतुत्वं जन्यत्वं चैकात्मवृत्तित्वसामा

नाधिकरण्यप्रत्यासत्त्यादिना हेतुत्वं जन्यत्वं चेति व्यवह्रियते तथा स्वाव्यवहितप्राक्कालवृत्तित्वलक्षणसंबंधेनानुमितौ कालिकसंबंधेन परामर्शस्य
कालनिष्ठप्रत्यासत्त्या हेतुत्वं जन्यत्वं च स्वाव्यवहितप्राक्कालवृत्तित्वप्रत्यासत्त्या हेतुत्वं जन्यत्वं चेति व्यवह्रियते। एवं च स्वाव्यवहितवृत्त्यादिविशेष
स्वाद्यघटितजन्यत्वपरमेवेति न कोऽपि दोष इति यथाश्रुतमेव सम्यगिति॥ प्रतिभाति गौरवमेवेति। एतेनानुमितिं प्रति समवायेन परामर्शस्य हेतुत्वा
त्समवायप्रत्यासत्त्यवच्छिन्नहेतुत्वघटितलक्षणस्य नातिव्याप्तिरिति निरस्तं। तद्धर्मत्वे गौरवात्। प्रकारान्तरेणापीति चरमज्ञानपदस्यानुभयपरत्वं।
विनैवेत्यादि। व्याप्तिप्रकारेणेत्यादि। अत्र सम्यक्त्वमुल्लेखाद्यनुपपत्त्या परामर्शस्य व्याप्यताघटकसंबंधघटकतयाधेयताद्यवगाहित्वमावश्यकं
सर्वत्राधेयत्वाधारत्वान्यतराद्यवच्छिन्नसंयोगादेरेव हेतुतावच्छेदकसंबंधत्वाभ्युपगमेनादोषात्। एतेनाधेयताद्यवगाहित्वस्य कारणतावच्छेदकत्वे
तदनवगाहिनो व्याप्यताघटकशुद्धसंयोगादिना पक्षे हेतुमत्ताज्ञानादनुमित्यनुदयप्रसंग इति निरस्तं। प्राचां मते आधाराधेयभावगर्भस्य हेतुसामा
नाधिकरण्यस्य व्याप्तिघटकतया हेतुनिरूपिताधारत्वाद्यवगाहिधिय एवानुमितिजनकत्वमित्याशयात्। यद्यप्येवं सति पर्वतनिरूपिताधेयता
त्वादिना पर्वतान्यनिरूपिताधेयताद्यवगाहिभ्रमात्मकज्ञानासंग्रह इति चेन्न। अन्यनिरूपिताधेयतादेरन्यसंबंधत्वाभावात्। पर्वतत्वावच्छि
न्ननिरूपिताधेयतात्वाद्यवच्छिन्नावगाहित्वस्य यावत्संसर्गमर्यादे निवेशगौरवभयाद्वैशिष्ट्यावगाहित्वविवक्षणे प्रमेयमितिज्ञानवारणसंभवादा
ह व्याप्ये पर्वतवृत्त्यादेरिति आदिना पर्वतवान्व्याप्यवृत्तित्वस्य परिग्रहः समानेति। न च तुल्यमुभयोः संसर्गतया भानप्रसक्तेरुभयोरुभयप्रका

रकतायत्तिरितिवाच्यं। वह्निव्याप्यधूमः पर्वतेऽस्ति। नच तुल्यत्वमुपस्थिते यत्र संयोगावच्छेदकतयाधारतानिरूपिताधेयताभानं वह्निव्याप्यधूमवा
न्पर्वत इत्यत्र च संयोगावच्छेदकरूपाधेयतानिरूपिताधारताभानमितिरीत्या एकघटकतयान्यभाने न तुल्यत्वाभावात्। न चैवं तुल्यवित्ति
वेद्यत्वभंगः। कल्प्यविषयकत्वमेव तत्र तुल्यत्वं न तु तुल्यविषयताकत्वमित्यदोषात्। अपद्वारा तद्वत्त्वरसादेव कल्प्यान्तरं भविष्यति। अदोष इति।
आधेयतावगाहित्वनिवेशे पक्षविशेषक्षविशेष्यकपरामर्शसंग्रहः। आधारतावमाहित्वावच्छिन्नविषयतानिरूपितसंयोगनिष्ठसां
ग्रह इत्येवंरूपदोषाभाव इत्यर्थः। तथाच वह्निव्याप्यधूमवत्त्वावच्छिन्नविषयतानिरूपितसंयोगनिष्ठसांसर्गिकविषयतानिरूपितविषयत्वनिष्ठ
सांसर्गिकविषयतानिरूपिताधारत्वनिष्ठसांसर्गिकविषयतानिरूपितपक्षविषयताशालित्वं पक्षविषयतानिरूपितसंयोगनिष्ठसांसर्गिकवि
षयतानिरूपिताधारत्वनिष्ठसांसर्गिकविषयतानिरूपिताधेयत्वनिष्ठसांसर्गिकविषयतानिरूपिताधारत्वनिष्ठसांसर्गिकविषयतानिरूपितपक्ष
(विषयताशालित्व)पिपपता निरूपितवह्निव्याप्यधूमत्वावच्छिन्नविषयताशालित्वं कोभपवेशिष्यावगाहित्वमितिपर्यवसितं किंतु सर्वत्र
संयोगाद्यवच्छिन्नाधारतैव वह्नितुतावच्छेदकसंबंधतत्वं तथाच धारत्वाधेयत्वयोस्तुल्यवित्तिवेद्यत्वे व्याप्यविशेष्यकज्ञाने संयोगाद्य
वच्छिन्नाधारतानिरूपितमाधेयत्वं पक्षविशेष्यज्ञाने च तादृशमाधेयतानिरूपितमाधारत्वमेव संसर्गः एवं च व्याप्यविषयतानिरूपिताधे हेत्व-
यत्वनिष्ठसांसर्गिकविषयतानिरूपितसंयोगावच्छिन्नाधारत्वनिष्ठसांसर्गिकविषयतानिरूपितप्रकारताशालित्वं पक्षविषयतानिरू

पितसंयोगावच्छिन्नाधारत्वनिष्ठसांसर्गिकविषयतानिरूपिताधेयत्वनिष्ठ। निष्ठसंसांसर्गिकविषयतानिरूपितसंसर्ग्याख्यविच्छिन्नाधाराशालित्वंवात
दुभयवैशिष्ट्यावगाहित्वमितिपर्यवसितंमित्यादुरुस्तन्न आधेयत्वाधारत्वयोस्संबंधत्वेसंयोगसमवायादीनांसंबंधत्वानुपमतेः नचेवंशापत्तिरनु
भवविरोधात्संयोगेनसाध्यतायांहेतुतायामित्यनेकग्रंथव्यस्यसाध्यतावच्छेदकसंबंधसामान्येद्रव्यत्वादिप्रातियोगिचैवाधिकरण्यनिरू
कौधूमसंयोगद्रव्याघयिमदी। धिनग्रंथस्यचासंगतेः किंचाधिकरणत्वस्यैवसंबंधत्वेतस्यचानेकतयासमवायस्यैकत्वमतेद्रव्यत्वादिसाध्यके
तादृशप्रतियोगिवैयधिकरण्यघटितव्याप्तिलक्षणानिव्याप्तिः तन्मप्यसंगतंनचापरत्वावच्छिन्नसंयोगादेस्संबंधत्वेपिनाधेयत्वावच्छि
न्नसंयोगादेस्संबंधत्वमितिवाच्यं। अर्धजरतीयमानाभावान्सामान्येसंविशेषचयत्वेमानाभावादुक्तास्वरसाच्चाहुर्व्यापतीत्यादि। अन्य
तरत्वेअन्यतरत्वेनानुगतीकृतमन्यतरत्वेव कुत्रचिदन्यतरत्वमेवेतिपाठः नचापमसंगतः तादृशावगाहित्वस्याहेतुत्वेतदन्यतरत्वस्यहेतु
तावच्छेदकत्वासंभवादितिवाच्यं। विषयतायाः ज्ञानस्वरूपत्वेनतादृशावगाहित्वान्यतरत्वस्यतदवगाहिज्ञानान्यतररूपत्वादन्यतरत्वेनतदवगाहि
त्वान्यतरस्यहेतुतावच्छेदकत्वेतदवच्छेदकस्यान्यतरत्वस्यहेतुतावच्छेदककोटिप्रविष्टत्वरूपहेतुतावच्छेदकत्वसंभवाच्च। तथाचवह्निव्याप्यधूम
त्वावच्छिन्नविषयतानिरूपितसंयोगनिष्ठसंसर्गतानिरूपिताधारत्वनिष्ठसंसर्गतानिरूपितवह्निव्याप्यधूमत्वावच्छिन्नविषयताशालित्वेतद
न्यतरत्वेतदन्यतरत्वंवोभयवैशिष्ट्यावगाहित्वमितिपर्यवसितं। यत्तुअत्राधारत्वाधेयत्वयोरुभयावगाहिज्ञानजन्यत्वमापःकल्पः आधार—

त्वाधेयत्वयोः समानसंवित्संवेद्यत्वेऽन्यतरावगाहित्वस्यैव विशिष्य जनकतावच्छेदकत्वमस्तु तावतैव पक्षे व्याप्यः व्याप्यवान् पक्ष इति द्विवि
धबुद्ध्यनुगतेः किमुभयावगाहित्वनिवेशेनेत्याशयेन द्वितीयः अवगाहित्वान्यतरदेव हेतुतावच्छेदकमित्यस्यान्यतरद्विशिष्य हेतुतावच्छेदकमि
त्यर्थः। ननु आधारत्वादेः समानसंवित्संवेद्यत्वाभावेऽन्यतरत्वेनानुगतीकृतयोर्जनकतावच्छेदकत्वमित्यर्थः। अन्यतरत्वादेर्जनकतावच्छेदक
त्वादिः कृत्वाप्यस्वीकारेण तादृशकल्पनस्य निर्वीजत्वापत्तेः। एकं च क्वचिदाधारतायां चेति पाठस्त्वपाठ एवेति तन्न। उक्तानिर्वीजत्वापत्तेरेव निर्वीजत्वा
त्। नन्वेवं गौरवमेव तद्बीजं एतदस्वरसेनैव व्याप्यविषयकत्वेनेति ग्रंथस्यावतारणीयत्वात्। ननु भ्रमपरामर्षस्योक्तरूपेणैकहेतुत्वे धूमाभाववति
धूमप्रकारकं पर्वताभाववति पर्वतप्रकारकमिदं मित्याकारकाप्रामाण्यज्ञानरूपाभावस्यैकत्रनिवेशापत्त्या एकविधाप्रामाण्यग्रहसत्वेऽन्य
विधपरामर्षादमित्यनुदयप्रसंगः। वं न चाप्रामाण्यग्रहाभावस्य स्वातंत्र्येण हेतुत्वमित्युक्तमेवेति वाच्यं। स्वातंत्र्येण हेतुत्वेपि उक्तस्थलेऽभयवि न्ये
धाप्रामाण्यज्ञानाभावरूपहेत्वभावेनोक्तापत्तेरिति चेन्न तत्रोक्तरीत्यैकविधाप्रामाण्यज्ञाननाशेसत्येवान्यविधपरामर्षादनुमित्यंगीकारा
त्। अथ तथापि पक्षे व्याप्याभावाप्रकारकत्वव्याप्येपक्षाभावाप्रकारकत्वरूपनिश्चयत्वयोरेकत्रविशेषे व्याप्यवान्न वा पर्वतः व्याप्यः पर्वते।
व्याप्यः पर्वतेन वा पर्वतो व्याप्यवानित्यादि ज्ञानादनुमित्यनुदयप्रसंग इति चेन्न। पक्षे व्याप्याभावाप्रकारकत्वस्य व्याप्ये पक्षाभावाप्रकार हे रं च
कत्वेसति यत्पक्षप्रकारकं तदन्यत्वेसति पक्षे व्याप्याभावप्रकारकं पक्षेतरदन्यत्वरूपत्वेन व्याप्येपक्षाभावाप्रकारकत्वस्य पक्षे व्याप्याभावाप्र

कारकत्वे सति यद्व्याप्यप्रकारकंपक्षतदन्यत्वे सति व्याप्ये पक्षाभावप्रकारकंपक्षतदन्यत्वरूपत्वेनोक्तदोषाभावात्। अपरे तु संयोगादिरेव संसर्गतया व्या
प्तिप्रविष्टहेतुसामानाधिकरण्यघटकोनत्वाधाराधेयभावः। एवंच तदुभयवैशिष्ट्यावगाहिनिश्चयत्वेनैवास्य व्याप्यत्वावच्छिन्नविषयतया च
पक्षधर्मतावच्छेदकावच्छिन्नविषयतया च निरूपिता या संयोगादिनिष्ठसांसर्गिकविषयता तच्छालिनिश्चयत्वेनेत्यर्थः। यथाश्रुते धूमपर्वतयो
ः संयोगघटत्वादिज्ञानवारणासंभवात्। तत्रानुमितौ व्याप्यत्वावच्छिन्नप्रकारतानिरूपितपक्षतावच्छेदकावच्छिन्नविषयताशालिनिश्चयत्वादिना
विशिष्यहेतुत्वे कारणतावच्छेदकगौरवमिति भावः। अथोक्तानुगतरूपेण परामर्शस्यानुमितिहेतुत्वे संयोगावच्छिन्नाधिकरणतासंसर्गे
ण व्याप्यांशे पक्षविशेषणकात् वह्निव्याप्यो धूमः पर्वतत्वानित्यादिज्ञानादनुमित्यापत्तिः। न च तत्र संयोगरूपव्याप्यताघटकसंबंधविषयता
न तदुभयविषयतानिरूपिता अपि त्वधिकरणत्वविषयतैव अतो न तस्योक्तकारणतावच्छेदकाक्रान्तत्वमिति वाच्यं। पर्वतत्वादृशाधिकरणत्वे
व्याप्यताघटकसंबंधस्य च तादृशज्ञानस्याप्युक्तकारणतावच्छेदकाक्रान्तत्वात्। न चेष्टापत्तिः। परामर्शविषयीभूतव्याप्यताघटकसंबंधानुयो
गिन्येव साध्यानुमितेरानुभविकत्वात्। उपदर्शितस्थले पर्वतादिस्तादृशसंबंधप्रतियोगितया तत्रानुमितेरनुभवविरुद्धत्वात्। एवं समवायादि
संबंधेन गुणादिहेतुना गुणत्वादौ द्रव्यत्वाद्यनुमानप्रसंगः। तत्रोपदर्शितकारणतावच्छेदकाक्रान्तस्य द्रव्यत्वादिव्याप्यगुणाधारो गुणत्वादि
रूपपक्षप्रकारकसमवायसंसर्गकज्ञानस्य प्रमात्वेन विशेषदर्शिनामपि संभवादिति चेन्न। यत्र संयोगस्तादात्म्यं वा व्याप्यताघटकसंबं

धर्मत्वेनैवोक्तानुगतरूपेणहेतुताकल्प्यतेअधिकरणतासमवायादिसंसर्गघटितव्याप्तिस्थलेतुतादृशसंसर्गावच्छिन्नव्याप्यप्रकारतानिरूपि
णहेतुताकल्प्यतेअधिकरणतासमवायादिसंसर्गघटितव्याप्तपक्षविशेष्यताशालिनिश्चयत्वेनैवेत्यदोषात्।नचसमवायादिसंसर्गघटि
तव्याप्तिस्थलेतादृशविशेषरूपेणहेतुतोपगमेघटेद्रव्यत्वव्याप्योगुणइत्यादिपरामर्षोत्तरंदोद्रव्यत्वाद्यनुमानप्रसंगइतिवाच्यंइष्ट
त्वात्।उक्तानुगतरूपेणहेतुतामतेपितादृशज्ञानेनसमवायावच्छिन्नाधेयतायाएवव्याप्यांशेसंबंधतयाव्याप्यताघटकीभूतसमवाय
सांसर्गिकविषयतायाव्याप्यपक्षोभयविषयतानिरूपितत्वविरहेणतादृशज्ञानादनुमित्युपपत्तेरसंभवात्तत्रानुमितेरनुभवसिद्धत्वेतु
ममममतएवतत्रहेतुत्वांतरकल्पनमावश्यकं वह्निव्याप्योध्वंसः पर्वतइत्याकारकसंयोगावच्छिन्नाधेयतासंसर्गकज्ञानस्थलेप्युक्तेवरीतिरिति
ध्येयं।नचैवंयत्रयत्रविशिष्यानुमितिहेतुतातत्रत्यानुमितावुक्तानुगतरूपावच्छिन्नकारणताघटितलक्षणाव्याप्तिप्रसंगइतिवाच्यं।यत्किंचिदनु
मितौतादृशकारणतानिरूपितकार्यतासत्वेततएववक्ष्यमाणजातिघटितलक्षणस्यसर्वत्रसमन्वयसंभवात्।तत्रोषंदर्शितदिशावसेयमि
तिवदंति।कदाचित्स्मृतेरुभयविशेष्यकत्वात्तत्संग्रहायापत्तिरतआहएकविशेष्यकेति।उभयविशेष्यकत्वापत्तेः उभयविशेष्यकत्वेबाधका
भावात्।कदाचिद्व्याप्यविशेष्यकत्वंकदाचित्पक्षविशेष्यकत्वमित्यत्रनियामकाभावप्रसंगादितिफलितोर्थः एतेनस्मृतिनिष्ठो हेतुंब·
भयवैशिष्ट्यावगाहित्वस्येवजन्यतावच्छेदकतयोभयविशेष्यकत्वेआयादकाभावइतिनिरस्तं जन्यज्ञानीयविषयतायाःकारणनि

यन्यतयास्मृतिनिष्ठतद्विशेष्यकत्वादात्तुभयवैशिष्ट्यावगाह्यनुभवस्यैवनियामकत्वे तद्बलात्सर्वदेवतदापत्तेरित्यपिकश्चित्ः यत्तूभयविशेष्य
कतापत्तेरित्यस्यामर्पवैशिष्ट्यावगाहिनिश्चयत्वस्यातिगुरुतया प्रत्येकरूपाभ्यांकार्यकारणभावद्वयेपिलाघवमित्यत्रतात्पर्यः अतएववक्ष्य
तिनचोक्तरूपेणेत्यादीति।तत्र।तथासतितुल्ययुक्त्यापरामर्शस्थलेपिप्रत्येकरूपाभ्यांहेतुतापत्तेः इत्यर्थइतिपाठः एतेन इतिवार्थ इतिपाठभ्र
मवतांनञ्ज प्रश्लेषसहितंपाठंव्याख्यायतदप्रश्लेषसहितंपाठंव्याचष्टे एकतरेत्यादीत्यवतारणंपरास्तम्।व्याचक्रुरिति।अस्वर
वीजंवतात्तृत्वस्मृतित्वीकर्तुमतेतादृशकार्यकारणभावमंगप्रसंगेइष्टापत्तिरिति।वस्तुतस्तुदीधितौस्मृतिस्थलेचनोभयवैशिष्ट्यावगाहिनिश्चयत्वेनहे
तुतेस्ततोनातिव्याप्तिरितिदर्शयतिएकतरेत्यादिना।तत्रविशिष्येवकार्यकारणभावद्वयंतेनतत्रस्मृतिस्थलेविशिष्येवव्याप्यत्वावच्छिन्नप्रकारतानि
रूपितपक्षतावच्छेदकावच्छिन्नविशेष्यताकस्मृतित्वंतथाविधनिश्चयत्वादिरूपविशेषधर्मेणैवेत्यर्थः अत्रविशिष्यहेतुताकल्पनस्यावश्यकत्वेता
दृशोभयवैशिष्ट्यावगाहिनिश्चयत्वेनहेतुतानकल्प्यतइत्याह।नोक्तरूपेणेतिनत्वनुगतेनोभयवैशिष्ट्यावगाहिनिश्चयत्वेनेत्यर्थः अत्रहेतुमाहगौ
रवादित्यादिना।ननुस्मृतिस्थलेविशिष्येवकार्यकारणकल्पनंकुतस्तत्रहेतुमाहसमानप्रकारकत्वेनैवेत्यादिचकारस्त्वर्थेसमानप्रकारकत्वे
नेति।तृतीयाविशेषणेतथासमानप्रकारकयोरेवेत्यर्थः तथाच्चयत्स्मृत्यप्रकारकस्मरणेतथाविधज्ञानमेवहेतुर्नतुतद्विशेष्यकज्ञानमितिअ
तोऽतिप्रसक्तत्वपातदुभयवैशिष्ट्यावगाहिनिश्चयत्वंनस्मृतिजनकतावच्छेदकमितिपर्यवसितार्थः।तत्प्रकारकस्मरणेनतद्विशेष्यकज्ञानस्यकार

णतेत्यत्र हेतुमाहुरेकतरेति।एकतरविशेष्यकज्ञानाद्व्याप्यादिविशेष्यकज्ञानात्।अन्यतरविशेष्यकेति।पक्षादिविशेष्यकेत्यर्थः।एतदभ्युपग
मे।निषेधमाहुरन्यथेति।अन्यथा एकतरविशेष्यकज्ञानादन्यतरविशेष्यकस्मरणोपगमे नियमेनेति व्याप्यविशेष्यकज्ञानजन्यानां पक्षविशेष्य
कज्ञानजन्यानां च सकलस्मृतीनामेव व्याप्यपक्षोभयविशेष्यकत्वप्रसंगादित्यर्थः।एतद्वा तु भवति रुद्धमिति भावः।विशिष्टवैशिष्ट्यबोधादौ ज्ञानत्वेन
हेतुतामतेप्येतत्तुल्ये नातिव्याप्तिसंभवः तत्रोक्तानुगतरूपेण हेतुताविरहादित्याहुरेवं चेति।व्याख्यायां पूर्वोक्तेति।धूमसमानाधिकरणाभाव
प्रतियोगितानवच्छेदकवह्नित्वसमानकालीनत्वधूमवान्पर्वत इत्यादिज्ञानादनुमित्यापत्तिरूप इत्यर्थः।नितरामित्यनेन तध्वमतिशयं विवृणोति
।पर्वत इत्यादिना।येषां मिश्रादीनां न हेतुत्वमिति तन्मते विशिष्टवैशिष्ट्यविषयताया अनंगीकारादिति भावः।प्रतियोगितावच्छेदकेति।व्याप्यवा
नवापक्ष इत्यादिसंशयोत्तरं तादृशाभावप्रत्यक्षानुदयात्तद्धर्मितावच्छेदकप्रतियोगितावच्छेदकप्रकारकप्रतियोगिज्ञानत्वेन हेतुतायां निश्च
यत्वनिवेशस्यावश्यकत्वादिति भावः।नन्वन्वयव्यतिरेकाववेवमानमत आहुः।वस्तुतस्त्विति।प्रतियोगिज्ञानासत्वे तद्रूपकारणाभावादेव न नेन्या॥
कारकप्रत्ययप्रसंग इत्यत आहुः।तत्सत्वेपीति प्रतियोगिज्ञानासत्वे तद्रूपकारणाभावादेव न नेन्या। नसत्वे ज्ञानसन्निकर्षादेवाभावांशे प्रतियोगि
नोपि भानात्तत्र तत्रायत्निरत आहुः अभावत्वावच्छेदेनेति।अभावो न घटादिपद इति वाधनिश्चयकाले इत्यर्थः।अतादृशबाधनिश्चय एव न संभवति अभा हेरंब
वधर्मिकघटघटाभावोभयप्रकारकज्ञानस्य निश्चयत्वासंभवादिति।चेन्न।धर्मिणि येन संबंधेन प्रतियोगिनः प्रकारत्वं तत्संबंधावच्छिन्नप्र

तियोगिताकतदभावस्यप्रकारेत्वएवज्ञानस्यसंशयत्वंप्रकृतेचनतथासंयोगावछिन्नप्रतियोगितासंबंधावछिन्नप्रतियोगितयाघटस्याभावांशेच
टाभावस्यचसंयोगावछिन्नप्रतियोगित्वसंबंधावछिन्नप्रतियोगिताकस्याभावांशेप्रकारत्वेनोक्तज्ञानस्यनिश्चयत्वसंभवात्।नेत्याकारकेति।तदा
नीमभावांशेप्रतियोगिभानप्रतिबंधकबाधनिश्चयसत्वेनाभावांशेप्रतियोगिनोभानासंभवेनेंद्रियसंबद्धविशेषणतावत्वादभावप्रत्यक्षत्वाव
छिन्नापत्तौक्रियमाणायांफलतोनेत्याकारकप्रत्यक्षप्रसंगइतिभावः।अथतादृशबाधनिश्चयकालेपिएकत्रद्वयमितिरीत्याअभावांशेघटाभावत्व
योर्भानेबाधकाभावेननेत्याकारकप्रतियोग्यमिश्रिताभावभानापत्तिरितिचेन्न।प्रतियोगितयाघटोऽवृत्तिरितिबाधनिश्चयकालेनस्याप्यसंभ
वात्।तन्निष्ठधर्मितावच्छेदकज्ञानस्यापितत्प्रतिबध्यत्वात्।तद्धर्मिकावृत्तित्वज्ञानस्यापितदभावनिश्चयप्रतिबंधकत्वस्यानुभवानुरोधेनसर्वसंमतत्वा
त्।नचतादृशबाधबुद्धेःप्रतियोगिविषयतामनंतर्भाव्यघटाभावादिप्रत्यक्षस्यापत्तिरितिवाच्यं।तत्रघटादिविषयत्वानिवेशेतादृशबाधदशायां
प्रतियोग्यमिश्रिताभावोपनीतभानानुपपत्तेः।लौकिकत्वनिवेशेप्रतियोगिमिश्रिताभावोपनीतभानस्याप्रतिबध्यत्वप्रसंगात्।अथसामान्य
सामग्र्याअभावप्रत्यक्षत्वावछिन्नजननेविशेषसामग्र्याअपेक्षिततयोक्तबाधाभावंविनापिसामान्यसामग्र्यापटाभावप्रत्यक्षत्वेनसामान्यध
र्मावछिन्नापत्तिः।उक्तबाधाभावस्यापिविशेषसामग्रीघटकत्वादितिचेन्न।उक्तबाधाभावंविनापिसामान्यसामग्र्यापटाभावप्रत्यक्षोदयेनाभावोन
घटीयःअभावोनपटीयइत्यादिबाधाभावान्यतमस्यैवविशेषसामग्रीत्वेनोक्तस्यत्वेबाधाभावं।तस्मादाद्यविशेषसामग्रीसत्वात्।अत्राभावत्वाव

छेदेनेत्यादिकमुपलक्षणं पटत्वप्रकारकज्ञानसत्वेंद्रियसंबद्धविशेषणतारूपकारणबलाद्घटाभावप्रत्यक्षापत्तिरित्यपि द्रष्टव्यं न च तत्रेष्टापत्तिः।
तदा घटाभावांशे पटभ्रमजनकदोषाभावेन पटस्याभानेन घटज्ञानासत्वेन च घटज्ञानासंभवात् घटाभावप्रत्यक्षस्य नेत्याकारकप्रत्यक्षपर्य
वसानेनेष्टापत्तिरसंभवात् घटत्वप्रकारकज्ञानं विनापि घटाभावप्रत्यक्षोत्पादेन घटत्वपटत्वादिप्रकारकज्ञानान्यतमस्यैव विशेषसामग्रीत्वेन
तद्विरहस्याप्यसंभवात्। नानेति। तथा च तत्तद्घटाभावादिसहकृततत्तदिंद्रियसंबद्धविशेषणतायास्तत्तद्धर्मावच्छिन्नसामग्रीत्वेनोक्तस्थले
तत्तद्धर्मावच्छिन्नसामग्र्यभावेन तत्तद्धर्मावच्छिन्नस्य सामान्यतोऽभावप्रत्यक्षत्वस्य कस्यापि कार्यतानवच्छेदकत्वेन तदवच्छिन्नस्याप
त्त्यभावान्नेत्याकारकप्रत्ययप्रसंग इति भावः। न च तथापि घटत्वप्रकारकपटज्ञानसत्वे घटाभावांशे भ्रमजनकीभूतदोषसत्वे घटाभावप्र
त्यक्षानुत्पत्त्यापत्तिः तदानीमुपदर्शितसामग्र्यभावादिति वाच्यं। घटाभावनिष्ठेंद्रियसंबद्धविशेषणतायास्तादृशप्रत्यक्षे पृथक्हेतुत्वमुपेत्य
तया फलाजनने घटत्वप्रकारकज्ञानस्येव पटत्वप्रकारकपटज्ञानतथाविधदोषादीनामपि सहकारित्वाभ्युपगमात् प्रतियोगितासंबं
धेन भ्रमस्येवानंगीकारेणोक्तस्थले घटाभावप्रत्यक्षानुत्पत्त्याविष्टापत्तेरेव संभवाच्च। नन्वेवं विशेष्ये विशेषणमिति न्यायेनाभावप्रत्यक्षासं
ग्रहः स्यात आह। अत एवेति। विशिष्टवैशिष्ट्यावगाहित्वस्य कार्यतावच्छेदकत्वादेवेत्यर्थः एवमग्रेपि। न्यायेनापीति। अपिरवधारणे नेतीत्यस्य हेरंब·
समुच्चये वा नाभावेति। तादृशप्रत्यक्षमलीकमेव कुतः संग्रह इति भावः। ननूक्तधर्मस्य कार्यतावच्छेदकत्वेपि तद्धर्मावच्छिन्न एवान्वयव्यतिरेका

ष्यांप्रतियोगितावच्छेदकप्रकारकप्रतियोगिज्ञानस्यहेतुत्वमावश्यकंअन्यथातच्छून्यतादशायांतदापत्तेरित्यतआह।अतएवचेतिविशिष्टवै
शिष्ट्यबोधेतितथाचतादृशविषयताशून्याभावप्रत्यक्षस्यालौकिकतयाव्यापकसामग्रीविधयाविशिष्टतावच्छेदकप्रकारकनिर्णयात्मकप्रतियो
गितावच्छेदकप्रकारकज्ञानस्यावश्यकतयानतच्छून्यतादृशायामुक्तापत्तिरितिभावः।नपृथगिति।एवंचान्वयव्यतिरेकयोरन्यथासिद्धतया
नप्रतियोगितावच्छेदकप्रकारकप्रतियोगिनिर्णयस्यपृथक्कारणताकल्पकत्वमित्याशयः।अत्रवदंति।विषयभेदेनेंद्रियसंबद्धविशेषणतायां
अनंतकारणत्वकल्पनेगौरवेणप्रतियोगिज्ञानस्यपृथक्कारणत्वकल्पनेमेवसम्यक्।ननुप्रतियोगिज्ञानहेतुतामतेपिविषयभेदेनेंद्रियसंबद्धवि
शेषणतायाःकारणताबाहुल्यमावश्यकंतुउक्तापत्तेस्तन्मतेपिसत्वात्प्रतियोगिज्ञानस्यविषयभेदेनातिरिक्तहेतुत्वकल्पनंपुनरधिकमितिमेवं।प्र
तियोगिज्ञानहेतुतामतेसामान्यतएवाभाववृत्तिलौकिकविषयतयाप्रत्यक्षंप्रतिस्वप्रकारीभूतधर्मावच्छिन्नप्रतियोगिताकत्वसंबंधेनज्ञानस्यस्व
रूपसंबंधेनेंद्रियसंबद्धविशेषणतायाश्चविषयमनिवेश्यहेतुताकल्प्यते।एवमभाववृत्तिविषयतयाज्ञानंप्रतिअभावोनघटीयद्रव्यादिबाधबु
द्धेःस्वीयाभावनिष्ठविशेष्यतानिरूपिताभावप्रकारतानिरूपितप्रतियोगितासंसर्गावच्छिन्नप्रकारतावच्छेदकधर्मावच्छिन्नप्रतियोगिताकत्वसंबं
धे।नप्रतिबंधकत्वंकल्प्यते।एवंचकारणतावच्छेदकसंबंधघटितसामानाधिकरण्यसंबंधेनप्रतियोगिज्ञानोक्तसंबंधावच्छिन्नप्रतियोगिताकवा
धाभावविशिष्टापइंद्रियसंबद्धविशेषणतायाअभावलौकिकप्रत्यक्षात्मकफलोत्पादकत्वांगीकारेणानुपपत्तेरभावाद्गौरवासंभवाच्च।एवमेतन्म

ते प्रतियोगितासंबंधेन प्रमेयो नांगीक्रियत इति न प्रतियोगिज्ञानहेतुतायास्तत्र व्यभिचार इति। अत्रोच्यते। प्रतियोगिज्ञानस्य पृथक्कारणत्वाभा
वेपि विषयभेदेनेंद्रियसंबद्धविशेषणतादिकारणताया दुर्लभत्वं विनापि सर्वमुपपादयितुमीशामहे। तथाहि। घटत्वादिप्रकारकज्ञानघटत्वादिवि
शिष्टवैशिष्ट्यबुद्ध्योः स्वीयकिंचिद्धर्मावच्छिन्नविशेष्यतानिरूपितप्रकारतावच्छेदकतासंबंधेन ज्ञानं प्रति तादृशप्रकारताश्रयनिष्ठस्वीयविशेष्य
तानिरूपितप्रकारतासंबंधेन ज्ञानं हेतुरित्येवं कार्यकारणभावः। एवमिंद्रियसंबद्धविशेषणताभावप्रत्यक्षयोरपि स्वविशेष्यप्रतियोगिताव
च्छेदकतासंबंधेनाभावप्रत्यक्षं प्रति स्वाश्रयप्रतियोगितावच्छेदकतासंबंधेनेंद्रियसंबद्धविशेषणताया हेतुत्वमिति रीत्या कार्यकारणभावः। एव
मुक्तबाधबुद्ध्यभावबुद्ध्योरपि स्वविशेष्यप्रतियोगितावच्छेदकतासंबंधेनाभावबुद्धिं प्रति उक्तप्रकारतावच्छेदकतोक्तविशेष्यतावच्छेदकतासं
बंधेनोक्तप्रतिबंधकत्वमिति प्रतिबध्यप्रतिबंधकभावः कल्प्यते। इत्थं च कारणतावच्छेदकसंबंधघटितसामानाधिकरण्यसंबंधेन विशेषण
तावच्छेदकप्रकारकज्ञानविशिष्टाया उक्तसंबंधावच्छिन्नप्रतियोगिताकबाधाभावविशिष्टाया इंद्रियसंबद्धविशेषणताया अभावलौकि
कप्रत्यक्षरूपफलव्याप्यत्वमुपेयते घटत्वादिप्रकारकज्ञानकालीनघटाद्यभावेंद्रियसंबद्धविशेषणतादशायामभावो न घटीय इत्या
दिबाधकालीनघटत्वादिप्रकारकज्ञानकालीनघटाद्यभावेंद्रियसंबद्धविशेषणतादशायां च नोक्तसंबंधेन विशेषणतावच्छेदकप्रकारक देरेच-
ज्ञानविशिष्टाया उक्तबाधाभावविशिष्टाया इंद्रियसंबद्धविशेषणतायाः सत्त्वमिति न काप्यनुपपत्तिः प्रतियोगितासंबंधेन प्रमेयो नांगीक्रि

यत इति तुल्यमेवातो न तत्रैतादृशसामग्रीविरहेपि क्षतिः द्रव्यादित्वासुषस्यलद्रवसंनिकर्षस्य तत्राहेतुत्वेपि क्षतिविरहः दोषत एव तदुपपत्तेरि
त्यपि कश्चित्। नचैवं सति सन्निकर्षशून्यकालेपि विषयतया प्रत्यक्षापत्तिः विषयतया प्रत्यक्षत्वस्य जन्यतानवच्छेदकतया तेन तदवच्छि
न्नापत्तिरुक्तसमवायेनाभावप्रत्यक्षत्वावच्छिन्नोत्पादस्य स्वविशेष्यप्रतियोगितावच्छेदकत्वसंबंधेनाभावप्रत्यक्षत्वावच्छिन्नोत्पत्तिनियततया
तदभावादेवेति निर्दोषमित्यलं मंदबुद्धीनामश्रद्धासंपादकसूक्ष्मविचारेणेत्यनेन तत्सर्वमभिप्रेत्याह ध्येयमिति। केचित्तु उक्तयुक्त्या भावत्वेन प्रतियो
गिज्ञानस्य स्वातंत्र्येण हेतुत्वेपि व्याप्यवत्पक्षाद्यभावप्रत्यक्षं प्रति व्याप्यवत्पक्षादिनिश्चयत्वेन न हेतुत्वं अभावलौकिकप्रत्यक्षे प्रत्येव तत्सहे
तुत्वात्। व्याप्यवत्पक्षाद्यभावश्च न लौकिकप्रत्यक्षगम्यः व्याप्तेरतीन्द्रियत्वेन तदवच्छिन्नास्यापित्वादिति रीतिर्दीधितौ हेतुत्वेपीत्यनेनास्वरसे
माहुः गौरवादेवेति। अन्यतरत्वघटकभेदयोरुपदर्शितनिश्चयत्वयोश्चैकं प्रत्रनिवेशेन विनिगमनाविरहादिप्रयुक्तगौरवादित्यर्थः एतेन
पूर्वोक्तमपरे त्वित्यादिमतमपि परास्तं। तत्राप्युक्तरीत्या निश्चयत्वनिवेशात्। प्रातिस्विकरूपेण्यैवेति। परस्परव्यावृत्तधर्मयोरेव तयोर्ज
न्यतावच्छेदकत्वेन परस्परजन्यानुमितौ व्यभिचाराभावादिति भावः केचित्तु नन्वभयेनेशिघावगाहिनिश्चयत्वेन न हेतुत्वसर्वत्र पक्षविप
शेष्यकपरामर्शस्य हेतुत्वे वह्निव्याप्यो धूमः पर्वतीयो नवेत्याकारकात्पर्वतपर्वताभावोभयकोटिकसंशय्या सर्वत्र वह्निव्याप्यधूमो नवेत्याकार
कोक्तधूमाभावोभयविशेष्यकपक्षविशेषणकसंदेहाच्चानुमितिवारणाय तादृशबुद्धिविषसंदेहभेदस्य जनकता। तावच्छेदककोटौ निवेशनेन

गौरवात्तत्पक्षविषयेशेकपरामर्शस्य हेतुत्वे च वह्निव्याप्यधूमाभावप्रकारकसंशयभेदमात्रनिवेशनेन लाघवात् ज्ञानं च धूमधूमाभावोभयविशे
ष्यकपक्षविशेषणकज्ञानस्य कथं संशयत्वं। एकधर्मिकविरुद्धोभयप्रकारकज्ञानस्यैव संशयत्वादिति वाच्यं। नव्यमते एकधर्मिकविरुद्धोभय
कोटिसंबंधावगाहिज्ञानमात्रस्यैव संशयत्वात्। तादृशवह्निव्याप्यधूमाभावविशेष्यकपर्वतविशेषणकज्ञानभेदो भवतापि निवेशनीयः। अन्य
था वह्निव्याप्यधूमाभावः पर्वते वह्निव्याप्यधूमवान्पर्वत इत्याकारकसंशयादनुमित्यापत्तेः। तादृशज्ञानस्याप्येकधर्मिणि विरुद्धोभयको
टिसंबंधावगाहितया संशयत्वादिति वाच्यं। तादृशज्ञानस्य संशयत्वे यद्वह्निव्याप्यधूमः पर्वते वह्निव्याप्यधूमवान्वा पर्वत इत्याकारकज्ञानस्या
पि संशयतया लिंगविशेष्यकपरामर्शहेतुतामते तद्भेदस्य निवेशनीयतया तदंशे उभयमते साम्यादिति तस्मात्स्वत्यादावतिव्याप्तिर्दुर्वारैवे
त्यस्वरसादाह व्याप्यविषयकत्वेनेत्याहुः। यथा च व्याख्याविषयकत्वनिवेशोपि व्याप्यवत्पक्षविषयत्वेन हेतुत्वनिवेशेनमावश्यकं त
थोक्तप्रायं प्राक्। किं तु द्रव्यपरामर्शजन्ये घटादिप्रत्यक्षे परामर्शात्मकानुभवजन्ये घटादिमात्रस्मरणे वातिव्याप्तिवारणाय तथावि
धनिश्चयत्वेन हेतुत्वनिवेश्यमित्याहुः। अत्र विशिष्टस्मरणे विशिष्टवैशिष्ट्यबोधादौ च प्रकारांतरेणैवातिव्याप्तेः प्रागुक्तत्वात् गुरुतरव्या
प्यविषयकत्वनिवेशनं व्यर्थमित्याशंकां परिजिहीर्षुरुपदर्शितविशिष्टवैशिष्ट्यबोधातिव्याप्तेस्तद्धेतुताया ज्ञानत्वनिवेशव्यवस्थापनप्र हेरंब
सक्तायावारणार्थं तन्निवेशनमावश्यकमित्याह दीधितौ एतेनेति। व्याख्यायां व्यभिचारं वारयतीति। ननु प्रागुक्तया संज्ञया न्यविशेषणताव

छेदकप्रकारकगुणत्वेनहेतुतयैवानतिप्रसंगे तत्रज्ञानत्वे विशेष्यव्यभिचारणक्लेशः प्रसारुनाद्वीतिन्यायमनुसरतीतिचेन्न। ज्ञानत्वानिवेशे उक्तरी
त्याऽनुद्बुद्धसंस्कारादापत्तिवारणायानंतोद्बोधकरूपविशेषसामग्र्याः सहकारित्वकल्पने गौरवात् उद्बोधकस्य विशेषसामग्रीत्वे सामग्रीप्रति
बंधकतायांगौरवाच्च। अनुद्बुद्धसंस्कारकालीनविशिष्टवैशिष्ट्यबोधसामान्याभावाधिकरणत्वे उक्तविशेषसामग्र्यभावकूटाधिकरणत्वस्य प्रयो
जकत्वमपेक्ष्यैकस्य ज्ञानत्वघटितधर्मावच्छिन्नाभावस्य तत्त्वेन लाघवेन न त्रुटितरूपेण हेतुत्वस्यैवोचितत्वाच्च। स्वतः साक्षात्संबंधेन व्यापारतः
व्यापारसंबंधेन विनष्टाया विशेषणधिय एव स्मृतिफलोपधानस्य व्यापारं विनानुपपत्तेरिति भावः अत्र वदंति विनष्टस्य निर्व्यापारस्यैव का
रणत्वे को दोषः। न चाव्यवहितप्राक्कालसत्त्वमेव हेतुत्वं तच्च स्वतो विनष्टस्य न संभवतीति व्यापारद्वारा तथात्वमिति वाच्यं। कारणतायामव्यवधानां
शप्रवेशे गौरवात्। अथ विनष्टादपि दृष्टादपि कार्योत्पत्त्यादि विष्टेन घटादिसामग्र्यां तोपि कार्यधाराप्रसंग इतिचेन्न। तत्कारणतायामव्यवधानप्रवेशे
प्यत्र तदप्रवेशात्। न चानुभवादपि विनष्टात्स्मरणधाराप्रसंग इति वाच्यं। संस्कारोद्बोधकत्वेनाभिमतानामपि स्मृतिहेतुत्वात्। अन्यथा संस्काररूप
व्यापारकल्पनेपि कार्यधाराप्रसंगतादवस्थ्यात्। स्मृतिं जनयित्वा संस्कारो नश्यतीति विशेष इति चेन्न स्मृतितोपि पुनः संस्कारात्। अथ फलोपधानं
नाम फलसाधित्वं तच्च विनष्टस्य न संभवतीति व्यापारद्वारकं तत्कल्प्यत इति चेन्न यतः फलं जायते तदेव फलोपधायकमिति निर्वचनसंभवात्। न
चैवं यागादपूर्वमपि न सिध्येदिति वाच्यं। इष्टत्वात्। धर्माधर्मयोः कीर्तनप्रायश्चित्तनाश्यत्वाद्यन्यथानुपपत्त्या तत्सिद्धेश्चेति· व्यापकतामेदा

संबंधभेदभिन्नप्रतियोगिताभेदेनव्यापकताभेदात्तन्नु अन्यतरत्वेनसंबंधनिवेशात्तत्रव्यापकताभेदः नचाननुगमः संबंधाननुगमस्यादोषत्वा
दित्याहुः संस्कारस्येति करणस्यव्यापारसंबंधेनकारणत्वं दृष्टं संस्कारस्यव्यापारत्वाभावे तेनसंबंधेनविशेषणज्ञानस्यकारणत्वंनसंभवति
संबंधत्वेमानाभावश्चेतिभावः संस्कारमिति विशिष्टधीत्वावच्छिन्नंप्रतिविशेषणधीर्यदिसंस्कारंविनापिजनिका तर्हिकथंसंस्कारोव्यापारः स्या
त् योयंजनयित्वैवयंजनयति तस्यैवतंप्रतिव्यापारत्वादित्याशयः अत्रेदंचिंत्यं व्यापारत्वंहितज्जन्यत्वेसतितज्जन्यजनकत्वंनच स्मृतिरूपवि
शिष्टज्ञानकार्यजनकत्वेनाप्युपपन्नं तच्चतज्जन्यतावच्छेदकावच्छिन्नजनकत्वमेव व्यापारत्वघटकमन्यथा दंडघटादिति समूहालंबनंप्रति
दंडस्यघटोपिव्यापारःस्यादितिवाच्यं घटोदंडजन्यत्वेसतिदंडजन्यजनकःस्यादिति व्यापादने दृष्टापत्तेः व्यापारव्यवहारविषयःस्यादित्या
पादनंनसंभवति तथाविधव्यवहारेयोयंजनयित्वेत्यादिगुरुरूपस्यैवनिमित्तत्वात् यदिच तथापि व्यवहारः संस्कारेणस्यादित्युच्यते
तदास्मृतौ तथापि विशेषणज्ञानस्यस्मृतिजननेसंस्कारःस्वजन्यापेक्षितेनानुभवजननेहेतुत्वे तावत्तुसिद्धं संबंधभेदाद्व्यापकताभेदश्च
पिनसम्यक् साक्षात्परंपरोदासीनस्यप्राक्कालसंबंधमात्रस्यैवव्यापकताघटकत्वात् नचस्मृतिंप्रतिसंस्कारद्वाराविशेषणधियोहेतु
त्वेलाघवादावश्यकत्वाच्चविशेषणविषयकसंस्कारस्यैवहेतुतास्यादितिवाच्यं विशेषणधीहेतुतोपपादकत्वेनैवतत्सिद्धेः नहिविशेषण हेत्व
धीकारणतायाःहेकान्वयव्यतिरेकाविवसंस्कारस्यतौक्त इतिनिर्विकल्पकात्मकस्येतीति नन्वेवंसामान्यलक्षणाजन्यज्ञानापीनजातित्वा

घवच्छिन्ननिखिलजातिविषयकनिर्विकल्पकस्मरणात्तत्स्वरूपतो निखिलजातिप्रकारकमानसस्य स्मरणस्य चासंभवेन सार्वज्ञापत्तिरिति चे
न्न स्वरूपतस्तत्प्रकारकोपनीतभाने तथाविधतत्प्रकारकज्ञानस्य हेतुत्वेन निखिलजातिविषयकनिर्विकल्पकसत्वेपि तदानीं स्वरूपतो निखि
लजातिप्रकारकमानससंभवात्। न वा तथाविधस्मरणोपगमेन विशिष्टस्मरणनिर्वाहेपि कृतिसाक्षात्कारपूर्वं विषयस्मृतिकल्पनया
नतरूपपत्तिः कृतिद्धितीयक्षणोत्पन्ननिर्विकल्पकस्मरणे न विशिष्टविषयकस्मृतिजननकाले कृतिनाशेन विशिष्टविषयोपधानेन कृतिसा
क्षात्कारासंभवात् एवमनंतनिर्विकल्पस्मृतेस्तत्तद्बोधकजन्यत्वस्य च कल्पनामपेक्ष्यानुभवत्वावच्छेदेन विशेषणज्ञानजन्यत्वमेवोचि
तमित्यपि द्रष्टव्यं। कल्पनं तद्विषयकस्मृतिं प्रति तद्विषयकज्ञानत्वेनेत्यं वरीयाकल्पनं। स्मरणापत्तेरिति। न तायादृकाभावः भिन्नवि
षयकानुमितिसामग्र्यभावादेवायादृकत्वात् किं तु स्मृतिं प्रतीत्यादि विशिष्टस्मृतित्वावच्छिन्नं प्रति संस्कारसंबंधेन विशिष्टानुभव
त्वावच्छिन्नं प्रति समवायेन विशेषणज्ञानं हेतुरिति भावः न चानुभवं प्रत्येवेत्यनेन पोनसत्त्वं तस्य स्मृतिं प्रति कारणतावच्छेदक
त्वात्। कारणताद्वयकल्पने गौरवादाह निर्विकल्पकेति फलमुखगौरवं न दोष इत्याशयः शेषं पूर्ववदिति प्राहुः अनुभवमितीति। अनु
भवत्वं च जातिविशेषो ननु स्मृत्यन्यत्वे ज्ञानत्वमिति न कार्यतावच्छेदकगौरवं। न च तत्र मानाभावः ज्ञानत्वस्य जन्यतावच्छेदकत्वेऽनंतनिर्विकल्प
कस्मरणकल्पने गौरवेण लाघवात्तादृशजातिविशेषस्य तज्जन्यतावच्छेदकतया सिद्धेः अत एवाग्रे दीधितौऽनुभवत्वजात्यंगीकारेति तत्र तुल्याद्दे

स्वरसभङ्गनाय। नन्वेवं विशेषणतावच्छेदकप्रकारकत्वाज्ञानहेतुतायां स्मृतौ व्यभिचारो दुर्वार एवेत्यत आह तथा चेति। स्मृतौ विशिष्टवैशिष्ट्यावगाहि
स्मृतौ। विशिष्टवैशिष्ट्यविषयतायाः स्मृतित्वव्यापकत्वेन न तत्र व्यभिचाराभावादनुभवत्वं तत्र न निवेशनीयमित्यपि कश्चित्तद्धेतुविशिष्टबुद्धिशिष्टान्नुभ
वत्वमित्येव पाठः स तु सुगम एव। ननु स्मृतौ व्यभिचारविरहेऽपि उक्तकृतिसाक्षात्कारे व्यभिचारोऽस्त्येवेत्यत आह। दीधितौ नियमत इति यत्र कृ
तिसाक्षात्कारस्तत्र विशिष्टविषयकस्मृतिं कल्पयित्वा तदनन्तरक्षण एव कृतिप्रत्यक्षोपगमादित्यर्थः। न च कृतिविषयस्मरणयोर्युगपदुत्पा
दासंभवात् क्रमेण तदुभयोत्पत्तौ कृतित्वनिर्विकल्पकोत्पत्तिक्षणे कृतेर्विनाशाद्विषयविरहेण कृतित्वविशिष्टकृतिप्रत्यक्षानुपपत्तिरिति वा
च्यं। ज्ञानयोरैक्ययौगपद्यानुपगमेन कृत्युत्पत्तिक्षणे विषयस्मृतिस्वीकारात् कृतित्वविशिष्टबुद्धौ तज्ज्ञानस्य हेतुत्वानुपगमेन तत्र निर्विकल्प
कस्यानभ्युपगमाच्च तत्र विशेषणविधेयौ हेतुत्वेऽपि विषयस्मरणस्येव कृतित्वविषयकत्वोपगमेनोपपत्तौ तन्निर्विकल्पकस्यावश्यकत्वात्।
अनादौ संसारे सर्वदैव कृतित्वविषयकसंस्कारसंभावनया कृतिसाक्षात्कारजनकविषयस्मृतौ तद्भाने बाधकाभावात्। न चैवमन्यत्र निर्वि
कल्पकोच्छेदः अपूर्वचैत्रत्वादेः प्राथमिकविशिष्टबुद्धिपूर्वं तत्स्मरणासंभवेन तन्निर्विकल्पकस्यावश्यकत्वात्। यत्र विशिष्टान्तरत्वं चाक्षुषा
दिसामग्रीकाले घटादीन्द्रियसंयोगोत्पत्तिस्तत्र द्वितीयक्षणे विशिष्टं तत्त्वाक्षुषाद्युत्पादाद् घटत्वादिस्मरणासंभवेन तदुत्तरं घटत्वादिविशिष्टधी हेतंब
निर्वाहाय घटत्वादिनिर्विकल्पकस्यावश्यकत्वाच्च। अपेक्षाबुद्धिस्थले विषयस्मृतिघटत्वादिविशिष्टधीनिर्वाहाय घटत्वादिनिर्विकल्प

कस्यावश्यकत्वाच्च। अपेक्षाबुद्धिस्थले विषयस्मृतिकल्पनं विनैवोपपत्तौ तत्कल्पने प्रयोजनाभाव इति नियमत इत्यसंगतमत आह व्याख्यायां
मपेक्षेति। न जन्यत इति इच्छादिजनने तस्य क्षणत्रयावस्थायित्वासंभव इति भावः। नन्वेवमपि यत्र चिकीर्षानंतरं विषयोपरक्तमुपादानप्रत्य
क्षं तदुत्तरकृतौ न स्मृतिकल्पनमिति वाच्यं। चिकीर्षायाः कार्य्यसहभावेन हेतुत्वोपगमात्। केचित्तु। अनुभवे प्रत्येकवात तस्याविशेषणधि
यः पौर्व्वं नियमतः नियमस्तत्वात् हेतुत्वस्य कल्पनादिति तदर्थो न्वोक्तदोष इत्याहुः। नियमत इत्यस्य नियमः कारणत्वं दंगीकृत्येसर्थः तथा
चत्स्वत्वलोपि पंचमीत्यपि कश्चित्। तदुभयमपि नियमतः कृतिसाक्षात्कारात्पूर्वमित्यादिपाठे संगच्छते वस्तुतः नादृशः पाठ एव नास्ति अत
एव व्याख्यायां नियमत इति विहाय नियमतो विषयस्मृतेरितीतिप्रतीकमुपात्तं। अत एवं दंतिविषयस्मरणकल्पनमपेक्ष्य विषयज्ञान
स्य तावत्कालस्थायित्वे वोचिता। न च समानाधिकरणस्याव्यवहितोत्तरक्षणवर्त्तिविशेषगुणत्वेन योग्यविभुविशेषगुणनाशत्वावच्छिन्नं प्र
ति हेतुत्वेनेच्छया तन्नाशः स्वत्वस्यैकस्याभावात् ज्ञानाव्यवहितोत्तरेच्छात्वेन तथेति चेत्तर्हि धारावाहिकस्थले पूर्वपूर्वज्ञानस्य नाशेनस्या
त्। न च ज्ञानाव्यवहितोभरचर्मविशेषगुणत्वेन तथात्वमिति वाच्यं। सुषुप्तिप्राक्कालीनज्ञानस्य चरमदुःखसाक्षात्कारस्य च नाशानुपपत्तेः अ
थ तत्र संस्कारः कालो वा नाशक इति चेदेवमननुगमे स्थिते त्रापिहृतिरिव नाशिकास्तु। किंच तद्रूपमपि नाशस्वरूपयोग्यतावच्छेदक
मेव कदाचित्तत्कविदस्तु न तु फलोपधायकमपि। विषयस्मरणस्य तत्संस्कारस्य तस्य नियतोद्बोधकस्य कल्पनामपेक्ष्य कृतिहेतुज्ञाननाशं प्रति

हृतेर्नाशकत्वकल्पनायाएवोचितत्वात्। अतएव च ज्ञाननाशे प्रतिज्ञानान्यवहितोत्तरसमये न हेतुत्वेऽपि निरस्तः फलबलेन हृत्यजनकता
ननाशंप्रत्येव तथात्वात्। अन्यथा ज्ञानसमयत्वेन तथात्वे तत्तोप्यतिरिक्तत्वे तदेव कल्प्यतां। तथासति ज्ञानस्य क्षणिकत्वापत्तिरितिचेदि्हा
पि स्मृतिसाक्षात्कारानुपपत्तिमवधेहीति अत्रोच्यते ज्ञानादीनां क्षणिकतावारणाय सामान्यतो नाशत्वावच्छिन्नं प्रतिस्वप्रतियोगिमत्वसं
बंधेन नाशस्य हेतुतायाः क्लृप्ततया विषयज्ञानस्य तावत्कालस्था।स्थायित्वं न संभवति योगिमत्वसंबंधेन नाशस्य हेतुतायाः न च सामान्य
तो नाशस्य हेतुत्वेपि विषयस्मृतिकल्पने पूर्वोक्तगौरवेण स्मृतिहेतुज्ञाननाशे स्मृतित्वेन विशेषतो हेतुत्वकल्पनया विषयज्ञानस्य तावत्काल
स्थायित्वं संभवतीति वाच्यं अन्यस्मृतिहेतुज्ञानस्य अन्यस्मृत्यनाश्यतया तत्तत्ज्ञानतत्तत्स्मृतिव्यक्तिभेदेन विशेषतो न हेतुत्वप्रयुक्तगौरवेण
स्मृतिकालीनवापुंसंयोगादेरपि विनिगमनाविरहेण नंतहेतुत्वप्रयुक्तगौरवेण च तदपेक्षया लाघवेन विषयस्मृतिकल्पनस्यैव युक्तत्वादिति दि
क्। अत्राहुः विशिष्टप्रत्यक्षत्वमेव विशेषणज्ञानजन्यतावच्छेदकं न तु विशिष्टानुभवत्वं बाधाभावादिजन्यतावच्छेदकतया सिद्धपरोक्षज्ञानवृत्तिजाति
विशेषेणानुमितित्वा विशिष्टानुमितिसामग्र्याभावादिजन्यतावच्छेदकतया सिद्धेनानुमित्यन्यज्ञानवृत्तिजातिविशेषादिना च समं संकरप्रसंगे
नानुभवत्वस्य जातित्वासंभवात्। एवं सत्यन्यज्ञानत्वस्य जन्यतावच्छेदकत्वे तस्य नित्यसाधारणतया जन्य गौरवात्। अनुमित्यादौ परामर्शादेरपि हेरंब
यामकत्वान्न दोषः किंचानुभवत्वस्य जन्यतावच्छेदकत्वे तस्य नित्यसाधारणतया जन्यत्वमपि विवेचनीयं नित्यवृत्तिधर्मस्य जन्यज्ञानवच्छेदकता

सनंतकारणतापत्तेरवछेदकगौरवाच्च अस्मन्मते जन्यप्रत्यक्षमात्रवृत्तिजातिविशेषस्यैवं जन्यतावछेदकत्वोपगमेन तत्साधारण्यविरहात्।
एतेन विशिष्टप्रत्यक्षत्वस्य विशेषणज्ञानजन्यतावछेदकत्वे साध्यज्ञानशून्यकाले प्रसिद्धसाध्यकपरामर्शात् साध्यविशेषणकानुमित्यापत्त्या
ऽनुमितौ विशेषणज्ञानहेतुत्वांतरकल्पने गौरवमित्यपि परास्तं अनंतकारणताकल्पनमवछेदकगौरवं चापेक्ष्य कारणताद्वयकल्पने
लाघवानपपातात्। अथैकधर्मविषयकज्ञानाद्धर्मांतरविशिष्टबुद्ध्यापत्तिवारणाय विषयमंतर्भाव्य कारणभावोपगमे विषयभेदेन कारणता
याआनंत्यप्रसंग इति तदर्थं प्रकारतासंबंधेन ज्ञानं प्रति विषयतासंबंधेन ज्ञानस्य हेतुता स्वीक्रियते एवं च एकपुरुषीयविशेषणज्ञानात् पुरुषां
तरीयविशिष्टबुद्ध्यापत्तिवारणाय शरीरविशेषावछिन्नत्वं तत्तदात्मसमवेतत्वं वा कार्यकारणयोर्विशेषणं देयं तथा च तद्विशेषितानुभवत्वस्य
नित्यसाधारण्यभावान्न जन्यत्वं कार्यतावछेदके निवेश्यं अस्तु वा विषयमंतर्भाव्यात्मनिष्ठप्रत्यासत्त्यैव कार्यकारणभावस्तथापि कायव्यूह
स्थले एकशरीरावछेदेन तदात्मविशेषणज्ञानसत्त्वेऽन्यशरीरावछेदेनापि तत्र विशिष्टबुद्ध्यापत्तिवारणाय शरीरविशेषांतर्भावस्यावश्यकतया
तद्विशेषितानुभवत्वस्य न नित्यसाधारण्यसंभवः न च सामानाधिकरण्यप्रत्यासत्त्यैव समानावछेदकत्वप्रत्यासत्त्यापि कारणभावोपगमादव
छेदकतानियमसंभवेन शरीरविशेषावछिन्नत्वनिवेशो निष्प्रयोजक इति वाच्यं। तथा सति कायव्यूहवत्सात्मनि एकशरीरावछेदेन विशेषण
ज्ञानसत्त्वे तदीयान्यशरीरावछेदेनाभिभावकभूतादृशविशेषणज्ञानसत्त्वे तादृशशरीरावछेदेन तदात्मनि विशिष्टबुद्ध्यापत्तेर्दुर्वारत्वात् तदात्मनि

समवायेन तच्छरीरस्यावच्छेदकतया विशेषणज्ञानसत्वादिति चेन्न । यत्र द्विनानाप्रत्यासत्त्या एककार्यतावच्छेदकावच्छिन्नं प्रति एकधर्मावच्छिन्नस्य
हेतुता तत्र तत्संबंधेन नानाधिकरणप्रत्यासन्नैककारणव्यक्तेस्तत्तत्संबंधेन नानाधिकरणप्रत्यासत्त्यैककार्यव्यक्त्युत्पादकतया अन्य
त्र व्यवस्थापितत्वात् विषयात्मशरीरेषु विभिन्नज्ञानव्यक्तीनामेव यत्र प्रत्यासत्तिस्तत्र तद्विषयप्रकारकतदात्मसमवेततच्छरीरावच्छिन्न
बुद्ध्युत्पत्त्यसंभवेन विषयात्मशरीरविशेषाननंतर्भाव्य तत्त्रितयनिष्ठत्रितयप्रत्यासत्त्यैव विशिष्टबुद्धिविशेषणज्ञानयोः कार्यकारणभावोप
गमात् । तस्मान्नित्यसाधारण्यवारणाय जन्यत्वनिवेशनमावश्यकमेव । ननु नित्यसाधारस्याधर्मस्य जन्यतावच्छेकत्वे बाधकाभावः न चा
तिप्रसंगवारणाय कार्यतावच्छेदकावच्छिन्नया व(घक्तो)नामेवाधिकरणतानिरूपकत्वेन कारणताघटकतया नित्यव्यक्तेरपि तदंतःपा
तितया तद्व्यवहितपूर्वक्षणाप्रसिद्ध्या कारणत्वानुपपत्तिरेव बाधिकेति वाच्यं । कार्यतावच्छेदककारणतावच्छेदकभेदेन कारणताया भिन्न
त्वात्तत्र नित्यवृत्तिधर्मः कार्यतावच्छेदकस्तत्र नित्यव्यक्त्यतिरिक्तव्यक्तीनामेव तत्तद्व्यक्तित्वेन निवेशे नानुपपत्तेरभावादिति चेन्न । कारणता
घटकाधिकरणतानिरूपकतात्मककार्यतावच्छेदकतस्यातिप्रसक्तधर्मेऽसंभवान्नित्यव्यक्त्यधिकरणत्वस्य कारणत्वाघटकतया कारणता
घटकाधिकरणतानिरूपकाप्यवरूपकार्यताशून्यनित्यव्यक्तिवृत्तितायां नित्यवृत्तिधर्मस्यातिप्रसक्तत्वेन कार्यतावच्छेदकत्वासंभवात् । यद्वा हेत्व-
तिप्रसक्तस्याप्यवच्छेदकत्वं तदा ज्योतिष्टोमादिजन्यतावच्छेदकतया स्वर्गादिनिष्ठवैजात्यसिद्धिर्न स्यात्तत्रापि ज्योतिष्टोमादिजन्यविजाती

यस्वर्गव्यक्तीनामेव कारणता शरीरप्रवेशेन चैत्रान्यास्वीकारेपि कारणतानुपपत्तिविरहात्कार्यतावच्छेदकत्वस्य स्वर्गत्व एव संभवादिति । अपरे
तु नैतद्युक्तं बौद्धाधिकारव्याख्याने दीधितिकारैर्णैव संकरदोषतानिराकरणेनापदोषाभावात् समवायकालिकविशेषणताभयसंबंधेना
नुभवत्वस्य कार्यतावच्छेदकतया नियमसाधारण्याभावेन द्वितीयदोषाभावाच्चेत्याहुः केचित्तु स्मृतिप्रतीत्यादिग्रंथो विशेषणज्ञानहेतुताया
नव्यभिचारोद्धारपरः प्रकृतानुपयोगात् विशेषणतावच्छेदकप्रकारकज्ञानहेतुतायां व्यभिचारवारणस्यैव प्रकृतत्वात् । न्यायावश्याभ्युप
पेत्वाद्युक्तरीत्या प्रकृतोपयोगः तादृशरीत्या विशेषणज्ञानहेतुतायां व्यभिचारो वार्यते तादृशरीत्या विशेषणतावच्छेदकप्रकारकज्ञानहे
तुतायामपि व्यभिचारवारणसंभवात् साक्षात्तदभिधानमुपेक्ष्यतं दंगे तदभिधानस्य संदर्भविरुद्धत्वात् किंतु विशेषणतावच्छेदकप्रकारकज्ञानहे
तुतायां व्यभिचारोद्धारपर एव तथा हि । विशेषणधीपः विशेषणतावच्छेदकप्रकारकधीपः हेतुत्वस्येति । अस्य कल्पनादित्यग्रिमेणान्वयः अयं
भावः नहि कारणतावच्छेदकस्य कार्यनियतव्यवहितपूर्ववर्त्तितावच्छेदकत्वं कारणताघटकं यागादीनामपूर्वाद्वारा स्वर्गादिकरणत्वानुपपत्तेः
॥ अपितु कारणतावच्छेदकावच्छिन्नतद्व्याप्यान्यतरत्वस्यैव एवं च तादृशान्यतरत्वस्य नियतपूर्ववर्त्तितानवच्छेदकत्वमेव व्यभिचारः प्रकृते च विशि
ष्टवैशिष्ट्यबोधत्वावच्छिन्नस्यानुभवस्याव्यवहितपूर्वकाले विशेषणतावच्छेदकप्रकारकज्ञानत्वावच्छिन्नस्य तथाविधस्मरणाव्यवहितपू
र्ववर्त्तितावच्छेदकत्वान्न व्यभि । चार इति । ननु साक्षात्परंपरासाधारणकारणताया ऐक्याभावादुपदर्शितान्यतरत्वस्य नियतपूर्ववर्त्तिता

वच्छेदकत्वेन कारणताघटकं गौरवादपि तु साक्षाद्धेतुतास्थले कारणतावच्छेदकस्य परंपरास्थले च व्यापारतावच्छेदकस्य प्रकृते च विशेषण-
तावच्छेदकप्रकारकज्ञानत्वावच्छिन्नस्य विशिष्टवैशिष्ट्यावगाहिस्मरणाव्यवहितपूर्वक्षणे तथाविधसंस्कारस्य च तादृशानुभवाव्यवहि-
तपूर्वक्षणे नियमतो सत्वान्न तयोरेकतरस्यापि नियतपूर्ववर्त्तितावच्छेदकत्वमिति कथं कारणतोपपत्तिरित्यतः कल्पांतरमाह निर्विकल्पके
ति कल्पनादित्यग्रिमेणान्वयः तथा च प्रथमं निर्विकल्पकात्मकविशेषणतावच्छेदकगोचरस्मरणं ततश्च तत्प्रकारकस्मरणं तदुत्तरमेव
च विशिष्टवैशिष्ट्यावगाहिस्मरणमुत्पद्यते न त्वादृत्येवत।दित्येवकल्प्यते अतो न व्यभिचार इति भावः निर्विकल्पकात्मकविशेषण
तावच्छेदकगोचरस्मरणकल्पनं च तत्प्रकारकज्ञापनोपपत्त्यर्थमन्यथा विशेषणज्ञानविरहेण तदनुपपत्तेः अंतरास्मरणद्वयकल्पने
नैतत्कल्पस्यरुगुतया कार्यतावच्छेदकसंकोचेन व्यभिचारस्तु दूरे इति अनुभवं प्रत्येवं चेतिविशिष्टप्रकारकानुभवत्वावच्छिन्नं प्रत्येवेत्यर्थः
।तस्याः विशेषणतावच्छेदकप्रकारकधियः तथा च स्मृतेः कार्यतावच्छेदकानाक्रांततया न व्यभिचारः इदं तु बोध्यं। अंतरा विशेषणताव-
च्छेदकप्रकारकस्मरणकल्पनमेव सम्यक् न त्वनुभवत्वास्य जन्यतावच्छेदकत्वं विशिष्टप्रकारकत्वेन समं तस्यैकत्र निवेशे गौरवात्। न च भ-
वन्मते ज्ञानत्वनिवेशसाम्यमिति वाच्यम् अस्मन्मते तस्याप्यनिवेशात् इच्छादिपूर्वमपि ज्ञानसत्वेन व्यभिचाराभावात्। न च यत्र फलसाधन- हेरंव-
ताज्ञानं फले इच्छा पापचिकीर्षा पापगोचरप्रवृत्तयः क्रमेणोत्पन्नास्तत्र प्रवृत्तौ व्यभिचार इति वाच्यं तत्र विशेष्ये विशेषणमिति रीत्ये

च प्रवृत्त्युपगमात्। यत्तु विशेषणतावच्छेदकभेदेन हेतुत्वे गौरवमिति तत्तन्निवेशस्य विशेषणतावच्छेदकतासंबंधेनानुभवं प्रति प्रकारतासंबंधे
न ज्ञानत्वेन हेतुता कल्प्यते ऽतो न विनिगमनाविरहादिप्रयुक्तगौरवावकाश इति तन्न। विषयनिष्ठतया हेतुत्वे तत्पुरुषीयत्वस्य कार्य
तावच्छेदके ऽवश्यं निविष्टत्वेनोक्तरीत्या गौरवस्य दुर्वारत्वात्। अस्मन्मते च तत्पुरुषीयत्वमात्रस्यावच्छेदकत्वोपगमात्। एतेन नित्यसाधा
रण्यवारणाय जन्यप्रत्यक्षवृत्तिजातिविशेष एव जन्यतावच्छेदकः अनुमित्यादौ परामर्शादेरिव नियामकः न चैवं साध्यतावच्छेदकप्रकार
कज्ञानशून्यकाले प्रसिद्धसाध्यकपरामर्शाद्विशिष्टवैशिष्ट्यावगाह्यनुमित्यापत्तिरिति वाच्यं। तथाप्यनुमितौ स्वातंत्र्येण तस्य हेतुत्वात् अज
न्यत्वनिवेशाप्रयुक्तगौरवतो लाघवादित्यपि परास्तं लाघवेन विषयनिष्ठतया हेतुत्वेन तत्पुरुषीयत्वनिवेशेनैव नित्यसाधारण्यवारणा
त्॥ विशेषणज्ञानजन्यतायां चानुभवत्वमवश्यं निवेश्यं तत्प्रकारकतामात्रस्य प्रकारतासंबंधेन तत्पुरुषीयत्वमात्रस्य वा नत्वे ऽपदर्शितप्रवृ
त्तौ व्यभिचारात्। एवं च निर्विकल्पकस्मरणमप्रामाणिकमेवेति ध्येयं। न च प्रवृत्तिं प्रत्युपायसाधनत्वेनोपादानप्रत्यक्षस्य साक्षस्य सा
क्षाद्धेतुतया तस्यैव च्चोपायतावच्छेदकरूपप्रवृत्तिप्रकारीभूतधर्मविषयकत्वतया व्यभिचारेण संभवतीति। वाच्यं फलतावच्छेदकीभूत
सुखत्वादेरपि उद्देश्यतावच्छेदकाविषयात्प्रवृत्तौ प्रकारत्वेनोपादानप्रत्यक्षस्य च तद्विषयकत्वानियमेन व्यभिचारावश्यंभावात्। ए
तेन संस्कारव्यावृत्तत्वस्य ज्ञाननिष्ठादिसाधारणैव जात्यस्य गुणमानसजनकतावच्छेदकतया ऽवश्यकल्पनीयत्वेन तस्यैव विशेषणज्ञानादिनि

एतत्याजनकतावच्छेदकतामुपेयत्तेन तु ज्ञानत्वस्यैवं च तादृशप्रवृत्तिपूर्वं विशेषणविषयिण्या इच्छाया एव नियमतः सत्वान्न व्यभिचार इत्य
स्यपि निरस्तं। प्रवृत्तिपूर्वं नियमतो वर्त्तमाना या उपायेच्छा या उद्देश्यतावच्छेदकीभूतसुखत्वादिविषयत्वानैयत्या फलेच्छाया अपि उपायेच्छाद्व
रैवेति तु तयाः प्रवृत्त्यव्यवहितपूर्वक्षणे तदवस्थानानियामात्। ज्ञानेच्छयोर्युगपदुत्पादासंभवेन फलेच्छानंतरमुपायेच्छोपादानप्रत्यक्ष
योः क्रमेणोत्पत्तावेव प्रवृत्तिसंभवात्तदव्यवहितप्राक्क्षणे फलेच्छाया असंभव इत्युक्तत्वादिति। ननु स्मृतौ व्यभिचाराभावेपि उपदर्शित
स्मृतिसाक्षात्कारे व्यभिचारेण ज्ञानत्वस्य विशिष्टवैशिष्ट्यबोधजनकतावच्छेदकत्वं न संभवतीत्यत आह नियमश्चेति क्वचिद्विषयस्मृतिकल्प
नाया व्यभिचारवारणाय समतया नियमत इति स्मृतिसाक्षात्कारपूर्वं तत्पूर्वक्षणे विषयस्मृतेः विशेषणतावच्छेदकप्रकारकविशेष्य
रूपविषयस्मृतेर्हि तथा च तस्या एव विशेषणतावच्छेदकप्रकारकज्ञानत्वरूपकारणतावच्छेदकाक्रांतताया सत्वेन न व्यभिचार इति भावः
अनुभवसामग्र्याः सन्निकर्षादिघटितायाः अनियमात्स्मृतिपर्यंतानुधावनं। पूर्वानुभवजन्यसंस्कारसत्वेनोद्बोधकस्य च कल्पनी
यतया स्मृतिसामग्र्या नियमेन कल्पयितुमशक्यत्वात्। न च सविषयकमात्रस्यापि नायकतया तत्स्मृतिरूपसंनिकर्षवत्त्वाद्विषयस्य
मानसमपि नियमतः संभवतीति वाच्यं। तत्र तन्मते तुल्ययुक्त्या उपनायकज्ञानविशेषणज्ञानयोरपि ज्ञानत्वेन हेतुत्वात्स्मृतितो विषय देख·
मानसानिर्वाहात्तिरिति वदंति। तन्न मनोरमं। विशेषणधियो हेतुत्वस्येति लिखनस्य यथाश्रुतपरत्वानुरोधेन निर्विकल्पसिद्धिरिति वदंति त्वक

कात्मकस्मरणोपगमस्य साक्षाद्व्यभिचारवारणसंपादकत्वानुरोधेन च स्मृतिं प्रतीत्यादिग्रंथस्य विशेषणज्ञानहेतुतायां व्यभिचारोद्धा
रपरत्वस्यैवोचितत्वात्। न चोक्तरीत्यासंदर्भविरोधः पूर्वोपदर्शितरीत्या विशेषणविषयकादिति पूर्वग्रंथपर्यालोचनया विशेषणज्ञान
हेतुतायां व्यभिचारवारणस्यैव प्रधीनत्वेन तदभिधानमुपेक्ष्य विशेषणतावच्छेदकप्रकारकज्ञानहेतुतायां तदभिधाने भवन्मतेएवसंद
र्भविरोधादिसर्क्षंलमनल्पजल्पनेन। देवादितीतिं दिव्व्याप्त्यनुमितिसामग्रीसमाजः तमेव दर्शयति। सत्यामिति दीधितौ परं केवलं अने
न दोषांतराभावकूटः। ननु कथमेतत् पर्वतो वह्निमान् स्यादित्याद्यापत्तावतिव्याप्तेः सत्त्वात्। न च तत्र पूर्वोपस्थितवह्निव्याप्त्यादिभानेन
व्याप्त्याविषयकत्वाभावान्न दोष इति वाच्यं पूर्वोपस्थितस्यापि तस्य घटादिवद्भानेमानाभावात्। पर्वते वह्निज्ञानं जायतामित्यादीच्छ
च्छाकालीनघटाद्यनुमितिसामग्रीकाले प्रतिबंधकसत्त्वेन धूमोऽवृत्तिरित्याद्यवृत्तित्वग्रहादिकालेऽधिकरणाद्यंशे धूमादिभानासंभवे
न च व्याप्तिभानासंभवाच्चेति चेन्न। तत्रापादकत्वांशे संशयस्यापि हेतुत्वेन निश्चयत्वेनाहेतुत्वात्। अत एवायत्नेपाद्यवत्ताज्ञानरूपद्विष्ट
ष्टसाधनताज्ञानसंपादनेनेच्छाविघटनद्वाराहार्यापादकसंशयविघटकत्वेन साफल्यं। तज्जनकतापामापादकवत्तांशेऽप्रामाण्य
ज्ञानास्कंदितत्वस्याहार्यत्वस्य वा निविष्टतया नातिप्रसंग इत्यपि कश्चित्। ज्ञानत्वादिकमादाय प्रत्यक्षादावतिप्रसंगवारणायाया
त्वेनानुभवत्वव्याप्यत्वेन याश्च तेन नानुभवत्ववारणं स्वस्यापि स्वव्याप्यत्वादत आह। तच्चेति। न चानुभवत्वनिरासायानुभवत्वा

न्यत्वे सति अनुभवान्यासमवेतत्वरूपं भेदगर्भं व्याप्यत्वमेव कुतो न विवक्षितमिति वाच्यं· तदपेक्षयास्य लघुत्वात्।यत्किंचिद्व्याप्यादिव
क्ष्यमाणलक्षणे तु अगत्या लघुभूतमपीदमुपेक्ष्य गुरुभूतं तद्वेवाहं तत तत्त्वतत्रैव स्फुटं भविष्यति।एतेन पांकांचित्सादो दर्शितभेदगर्भव्याप्ति
व्याप्यत्वपदार्थत्वस्य स्फुटतयोपादानेन तद्विरोधात्त्वापितदेवव्याप्यत्वंनलिदमिति प्रत्युक्तं कारणतानिरूपितत्वस्य कारणताप्रतियोगिक
त्वस्य व्याप्तिविशेषणत्वभ्रमनिरासायात्र प्रतियोगिकांतमिति उक्तरीत्या ऽऽयुक्तावार्यत्तित्व जातिमादायातिप्रसंगनिरासायात्र कारण
तायां निश्चयत्वावच्छिन्नत्वनिवेशः केचित्तु निश्चयनिष्ठकारणतेत्युक्तौ परामर्शीयविशेषणज्ञानत्वावच्छिन्नकारणतानिरूपितव्या
प्यावि षयकानुमितिवृत्तिकार्यतावच्छेदकवुद्धित्वमादाय प्रत्यक्षादावतिव्याप्तिः पर्याप्तिमनिवेश्य तादृशज्ञानत्वावच्छिन्नेत्युक्तौ तादृशा-
निश्चयाभाववस्य पर्वतो वह्न्यभाववानिति ज्ञाननिष्ठकार्यतावच्छेदकं वुद्धित्वमादायतथैतितां निवेश्य तादृशनिश्चयत्वावच्छिन्नेत्युक्त
मित्याहुः आलोकेत्यादि। अत्र वदंति। अव्यवहितोत्तरत्वस्य कार्यतावच्छेदकत्वेनुमितित्वनिवेशस्य निष्प्रयोजनतया ऽसंभवप्रसंगदू
तितत्त्विं यं।अप्रामाण्यज्ञानास्कंदितात्कार्यतत्तल्लिंगकपरामर्शाव्यवहितोत्तरपर्वतो वह्निमानिति ज्ञानादबोधाद्दोव्यभिचारवारणाय तल्लु
लीयतत्तदप्रामाण्यज्ञानाभावकूटात्कार्यज्ञानभेदकूटानां परामर्शनिष्ठतया कार्यतावच्छेदककोटिप्रवेशमपेक्ष्यानुमितित्वनिवे हेत्व-
शे लाघवात्। कार्यतानतिप्रसक्तस्यैव कार्यतावच्छेदकत्वेनानुमितित्वघटितकार्यतावच्छेदकस्यानतिप्रसक्त्याऽनुमितिभिन्नानंत

पदार्थानां कारणतायामधिकरणतारूपिकत्वेन निवेशमपेक्ष्यानुमितित्वनिवेशस्यैवोचित्याच्च अनयैव रीत्या पक्षसाध्यविषयताया अपि का
र्यतावच्छेदककोटौ निवेशोनुसंधेयः एतेनात्र लक्षणेऽनुमितित्वस्यानिवेशेनासंभवद्वैयर्थ्यस्य सामग्र्यां कांचिदित्यादिलक्षणे तत्प्रणयनं दी-
धितिकारस्य त्विदं तोपि परास्ताः उक्तरीत्या तन्निवेशस्यावश्यकत्वात्। न च मानाभावेन तदसिद्ध्या तन्निवेशासंभवः कार्यतावच्छेदकतयैव तत्सिद्धे
ः इदं च सर्वं जातिपदोपादानेन दीधितिकृतापि सूचितं अन्यथा यां कांचिदित्यादिवक्ष्यमाणलक्षणवत्कार्यतावच्छेदकधर्मसमवायित्वमि
वोक्तं स्यात्। अथ लाघवेन धर्मितावच्छेदकमनिवेश्य वह्न्यादिविधेयतानिरूपितविशेष्यतावच्छेदकतासंबंधेनानुमितौ वह्निव्याप्यधूमा
दिप्रकारतानिरूपितविशेष्यतावच्छेदकत्वसंबंधेन परामर्शस्य हेतुतयैतल्लक्षणेऽसंभव इति चेन्न उपदर्शितस्य संबंधत्वे मानाभावात्।
तस्य हेतुत्वनियामकतया तेन संबंधेन हेतुत्वासंभवाच्च। किंच वह्निव्याप्यधूमवच्चत्वरे वह्निव्याप्यालोकवान् पर्वत इति समूहालंबनजन्या
नुमितौ व्यभिचारवारणाय वह्निव्याप्यधूमादिप्रकारतानिरूपितविशेष्यतावच्छेदकताविशिष्टवह्न्यादिविधेयतानिरूपितविशेष्यतावच्छे
दकताया एककार्यतावच्छेदकसंबंधत्वस्य वाच्यतया तादृशानसमानकालत्वनियमेन विनश्यदवस्थपरामर्शजन्यानुमितेरसंग्रहप्रसंगो दु
रुद्धरः। अपि च लाघवज्ञानेतरबाधादिसहकारेण साध्यानानवच्छेदकपक्षतानवच्छेदकरूपस्याप्यनुमितिप्रकारतया तद्धूमत्वतद्वह्निज
न्यसत्त्वहेत्वन्वयव्यतिरेकित्वादित्यनुमाने धनधूमत्ववह्नित्वाभ्यां कार्यकारणभावग्रहात् निरुक्तविशेष्यतावच्छेदकतायाः प्रत्यासत्तित्वासंभवः नी

रूपवत्तल्लाघवच्छिन्नविशेष्यकपरामर्शोत्तरत्वावच्छेदेन बाधादिकालीनात्मवृत्तितल्लाघवच्छिन्नविशेष्यकानुमित्यापत्त्या पर्याप्तिमत्तर्माव्येववि
शेष्यतावच्छेदकतायाः प्रत्यासत्तित्वस्य वाच्यत्वात्। अधिकमन्यत्रमत्कृतौ द्रष्टव्यं। तद्घटकेति परामर्शघटकतयोक्तकार्यतावच्छेदकघ
टकेत्यर्थः सामानाधिकरण्येनेतीति। अथालोकादिलिंगकानुमितिव्यावृत्तये कार्यतावच्छेदकघटकेत्यर्थः सामानाधिकरण्येनेतीति।
अथालोकादिलिंगकानुमितिव्यावृत्तये कार्यतावच्छेदककोटौ तत्तल्लिंगकपरामर्शाव्यवहितोत्तरत्वस्य निवेशे गौरवेणाव्यवहितपूर्वक्षणा
वच्छिन्नतल्लिंगपरामर्शाधिकरणताविशिष्टसमवायस्य तल्लिंगकपरामर्शजन्यतावच्छेदकसंबंधत्वे पर्वतोद्देश्यकवह्निविधेयकानुमिति
त्वादेर्जन्यतावच्छेदकत्वेनोपपत्तेर्लाघवात्। अत एव कार्यतावच्छेदकेनुमितित्वादिनिवेशनिबंधनोक्तरीत्या दोषः कोपि न संभवति। एवं च ज्ञा
नत्वस्य कार्यतावच्छेदककोटावप्रवेशे न तद्घटकं सामानाधिकरण्येनेति व्यर्थमेवेति चेन्न लाघवावच्छिन्नसाध्यकपरामर्शजन्यताघटि
तजातिघटितलक्षणवत्। ज्ञानलाघवच्छिन्नसाध्यकपरामर्शजन्यताघटितमपि जातिघटितलक्षणं संभवतीत्येतत्सूचनाय ज्ञानवृत्तित्व
मादाय ज्ञानमात्रकथमनतिप्रसंगः ज्ञानत्वस्य कार्यतासामानाधिकरण्यादवच्छेदकत्वाद्वेत्यत आह ज्ञानत्वस्येत्यादि इति भावः। इतीत
था च तद्रूपेतदंशे सामानाधिकरण्येनावच्छेदकताया मासमानत्वमेव सामानाधिकरण्येन तदवच्छेदकत्वं तद्रूपमुख्यविशेष्यतावच्छे हेरंब·
दकत्वमितिफलितोर्थ इत्याशयः। एतेनात्र सामानाधिकरण्यं समवायेन वृत्तित्वं वाच्यं। अन्यथा कार्यताधिकरणानुमितौ स्वावच्छिन्न

विधेयताकत्वादिसंबंधेन वह्नित्वादेः सत्वाद्धूमाद्यवनिव्याप्तिरिति परास्तं। ज्ञानत्वावारणायोक्तप्रकारस्यावश्यकत्वेनैवसामंजस्यात्। नन्वत्र ज्ञान
वृत्तित्वदस्यसामानाधिकरण्येनैतस्य च वैयर्थ्यं अवच्छेदकविशेषणकोटिनिविष्टवह्नित्वज्ञानत्वादीनां कार्यतावच्छेदकतायामवच्छेदकत्वे
न कार्यतावच्छेदकत्वाभावेनातिप्रसंगाद्यभावात्। न चोक्तविशिष्टधर्मस्य कार्यतावच्छेदकत्वे तद्घटकवह्नित्वादीनामवच्छेदकत्वं दुर्वारं विशिष्ट-
स्य तद्घटकानतिरिक्तत्वात्। शुद्धानुमितित्वस्यातिप्रसक्ततया तत्वासंभवादिति वाच्यं। विशिष्टघटकानां सर्वेषामवच्छेदकत्वेऽवच्छेदकभेदेन
कार्यताभेदप्रसंगापत्त्याऽनुमितित्वमात्रस्यैवावच्छेदकत्वात्। न चातिप्रसक्तत्वकेवलस्य तस्यातिप्रसक्तत्वेपि सामानाधिकरण्येनावच्छेदक
तावच्छेदकीभूतवह्निविधेयकत्वादिविशिष्टस्य तस्यानतिप्रसक्तत्वात्। न च कार्यतानिरूपितावच्छेदकत्वादिनिरूपिताया अवच्छेदकतायाः
परंपरया कार्यतानिरूपितत्वात् वह्नित्वादिकमादायातिप्रसंगो दुरुद्धर एवेति वाच्यं उक्तपरंपरया कार्यतानिरूपितावच्छेदकतायां लक्षणा
घटकत्वादिति चेन्न। विशिष्टघटकानुमितित्वस्य कार्यतावच्छेदकत्वकल्पनं विशेषणपरंपरायाश्च यथाक्रमं तदवच्छेदकत्वादिकल्पनं चापे
क्ष्य विशेष्यविशेषणभावापन्नतावत्स्वाद्यर्थेषु व्यासज्यवृत्तेरेकस्याः कार्यतावच्छेदकतायाः कल्पनस्यैवोचितत्वात्। न चैवमवच्छेदकभेदे
न कार्यताभेदप्रसंग इत्युक्तमचेति वाच्यं। अवच्छेदकताभेदस्यैव कार्यताभेदकत्वेनावच्छेदकभेदेप्यवच्छेदकताया अभेदेनादोषात् युज्य
ते चैतत्। अन्यथा विशिष्टस्यावच्छेदकत्वं न तु शुद्धस्येति प्रतीत्यानुपपत्तेः भवन्मते शुद्धविशेष्यस्यैवावच्छेदकतया विशेषणपरंपराया अनव

छेदकत्वात्। नचावच्छेद्यसामानाधिकरण्यस्यावच्छेदकतानियामकत्वेनविशेष्यस्यानुमितित्वस्यावच्छेदकतासंभवेपिविशेषणवह्नित्वादीनां
कार्यत्वासमानाधिकरणतयावच्छेदकत्वासंभवेनतदंतर्भाव्यव्यासज्यवृत्तिरेकावच्छेदकतानसंभवतीत्युक्तप्रवादस्यविशेष्यनिष्ठावच्छेदक
त्वंविशेषणावच्छिन्नंनतुनिरवच्छिन्नं। यत्रतुनिरवच्छिन्नमवच्छेदकत्वंतत्रैवशुद्धस्यावच्छेदकत्वमित्येतत्परइतिवाच्यं॥ अवच्छेद्यसामानाधि
करण्यविशेष्यविधयाऽवच्छेदकतायामेवनियामकत्वेनविशेषणत्वेनावच्छेदकनांवह्नित्वादीनांकार्यतावैय्यधिकरण्यस्याकिंचित्करत्वात्
फलबलेनतथैवकल्पनात् अन्यथावच्छेद्यसामानाधिकरण्यस्यानतिप्रसक्तत्वस्यचावच्छेदकतानियामकत्वस्यैवासिद्धिप्रसंगात्। नचैवं
सर्वत्रसविशेषणस्थलेविशेष्यनिष्ठावच्छेदकत्वस्यविशेषणानवच्छिन्नत्वप्रसंगइतिवाच्यं। इष्टत्वात्। नचैवंजात्यतिरिक्तपदार्थस्यकिंचि
द्रूपेणैवावच्छेदकत्वंनतुस्वरूपतइतिप्रवादविरोधः तेनजात्यतिरिक्तपदार्थनिष्ठावच्छेदकत्वस्यसावच्छिन्नत्वप्रतिपादनादितिवाच्यंत
स्यतादृशपदार्थस्यतत्तदवच्छेद्यावच्छेदकांतरविशेष्यतयैवतत्तदवच्छेदकत्वमित्यर्थकत्वात्। नचानुमितित्वादीनांप्रत्येकमतिप्रसक्त
त्वेनकथमवच्छेदकत्वं। तथापिशुद्धविशेष्यस्यातिप्रसक्तेरसत्त्वात्। अवच्छेदकविशिष्टस्यानतिप्रसक्तत्वमस्त्येवेतिचेत्। अवच्छेदक
तापर्याप्त्यधिकरणस्यानतिप्रसक्तत्वमभाप्यस्यैवेतितुल्यं। नचसमवायसंबंधावच्छिन्नानुमितित्वनिष्ठावच्छेदकतायाएवासंभवे हेरंब·
तेवह्न्यादिविधेयकत्वादावंगीकारेतत्रापिसमवायेनावच्छेदकत्वव्यवहारापत्तिरितिवाच्यं। तस्यसमवायसंबंधावच्छिन्नावच्छेदकत्व

मित्यर्थे दृष्टान्ते एकस्याएव तस्यास्तत्रांगीकारात् अवच्छेद्याधिकरणेसमवायेन वर्त्तमानत्वे सत्यवच्छेदकत्वमित्यर्थे त्वसमवेते समवायेन वर्त्तमा
नत्वाभावादेतदनापत्तेः एवं च परामर्षजन्यतावच्छेदकतायां वह्नित्वादावपि सत्वेन तत्रातिव्याप्तिवारणाय ज्ञानवृत्तिरिति सामानाधिकर
ण्येनेति च सार्थकमिति संप्रदायः। एतदभिप्रेत्यैवावच्छेदकताश्चयस्माद्दृशविशिष्टशरीरघटकपदार्थस्तोमएवेत्युक्तं। नव्यास्तु वह्नित्वादेर्व्या
सज्यरन्यवच्छेदकत्वानंगीकारेपि न तत्पदवैयर्थ्यं वह्निव्याप्यधूमवत्ताज्ञानाव्यवहितोत्तरवह्नित्वावच्छिन्नविधेयताकानुमितित्वस्य जन्य
तावच्छेदकत्वे स्वावच्छिन्नविधेयताकतादृशज्ञानाव्यवहितोत्तरानुमितित्वसंबंधेन वह्नित्वस्य स्वाश्रयवह्निव्याप्यधूमवत्ताविषयकाव्य
वहितोत्तरवह्नित्वावच्छिन्नविधेयताकानुमितित्वसंबंधेन ज्ञानत्वस्य च विनिगमनाविरहेणावच्छेदकत्वस्यावेश्यकत्वेन तत्पदसार्थक्यात्।
न चैवं तत्पदोपादानेपि वह्नित्वादेरुक्तसंबंधेन कार्यविशेषणीभूयैवावच्छेदकतयातिसंप्रगताद्वस्थ्यमिति वाच्यं सामानाधिकरण्ये
नावच्छेदिकेत्यस्य समवायेनावच्छेदिकेत्यर्थादिति तेसमवायस्यावच्छिन्नत्वाद्यंशे वह्नित्वादिसंबंधस्य चाप्रवेशेन लाघवस्य विनिग
मकत्वेन वह्नित्वावच्छिन्नविधेयताकानुमितित्वस्यानवच्छेदकतयानुमितित्वजातिमादायलक्षणगमनासंभवात्। वस्तुतस्तु स्वावच्छिन्न
विधेयताकतादृशज्ञानाव्यवहितोत्तरानुमितित्वादिसंबंधेन वह्नित्वादेरवच्छेदकत्वे तादृशविधेयतादृशानुमितित्वयोर्विशेष्यविशेषण
भावे विनिगमनाविरहेति स्वावच्छिन्नविधेयताकत्वसमवायोभयघटितसामानाधिकरण्यसंबंधेन वह्नित्वविशिष्टानुमितित्वस्यैवाव

छेदकत्वमुपेयते। अत्र च न विनिगमनाविरहः अनुमितित्वविशिष्टवह्नित्वस्यावच्छेदकत्वे स्वावच्छिन्नविधेयताकत्वस्य कार्यतावच्छेदकता
वच्छेदकसंबंधत्वे न गौरवं वह्नित्वविशिष्टानुमितित्वस्यावच्छेदकत्वे सपवापस्यैव तथात्वमिति लाघवस्यैव विनिगमकत्वादिति न वह्नित्वा
दिकमादायातिप्रसंग इति तत्र द्वैयर्थ्यं दुरुद्धरमेव एवं च सामानाधिकरण्येनावच्छेदकस्य स्वसमवायेनावच्छेदकेस्यर्थकत्वेउदक्षरत्वे
चेति पूर्वोक्तमेव समंजसं। व्याप्यविषयकत्वापेक्षया नात्र लाघवमेतस्य गुरुत्वादत आह तथा चेति। अव्यवहितोत्तरत्वं हीति। अत्र प
थमोपात्तस्याव्यवहितत्वस्य चरमं निर्वचनं शब्दलाघवाय अन्यथा तच्छेदकत्वेनापरामर्षे शब्दगौरवापत्तेः। मानाभावादिति तथा चासं
भव इति भावः पुरुषांतरीयान्यस्लिंगकानुमितौ व्यभिचारादाह सामानाधिकरण्येति तस्य संबंधपरिचायकतया कार्यतावच्छेदकंप
रामृष्टे तत्तस्यैव वुद्धिस्थत्वात्। तथा च तत्त्वघटितस्य संबंधपरिचायकतया कार्यतावच्छेदककोटावनिवेशेनेनोक्तदोष इति भावः। मा
नाभावादिति विशिष्टधीनियामकस्यैव संबंधत्वादिति भावः वह्न्यनुमितिक्षणे वह्न्यनुमित्युत्पत्तिक्षणेस्वप्रागभावेति। इदमुपलक्ष
णं अन्यस्याप्यनेकपदार्थघटितस्य संबंधत्वे मानाभाव इति द्रष्टव्यं। एतेन स्वव्यापकवह्निसामानाधिकरण्यावच्छिन्नत्वस्यावच्छिन्न-
त्वोभयसंबंधेन सामान्यतो धर्मविशिष्टप्रकारतानिरूपितपर्वतत्वावच्छिन्नविशेष्यताकस्वरूपाखिललिंगपक्षपरामर्षसाधारण
वह्निव्याप्यवत्पर्वतनिश्चयत्वेन हेतुत्वस्य पर्वतोद्देश्यकवह्निविधेयकानुमितित्वेन कार्यत्वस्य स्वीकारान्न मूलोक्तलक्षणदोष इस

पिनिरस्तम्। इत्यस्वरसादितिमूलोक्तलक्षणस्यपूर्वापराविरोधेनसुवचत्वेऽपक्षानर्हता अत्रचपूर्वंमूलकारेणविस्पसंबंधत्वामीष्टिरधीनिया
मकस्यसंबंधतो। क्वाव्यवहितोत्तरत्वादेःसंबंधत्वासंभवेननैतल्लक्षणंतन्मतेसंभवतिप्रकारांतरेणतस्यसंबंधत्वांगीकारेणतदुपपादनेचतद्विरो
धइतीदमुपेक्ष्यस्वातंत्र्येणलक्षणांतरकरणमेवोचितमित्याशयःतेनाव्यवहितोत्तरत्वस्यसंबंधत्वंनास्तीतिदीधितिकाराभिप्रायवर्णनेना
ग्रेपरामर्शग्रंथेप्रतिवक्ष्यतेहितत्रतदीयत्वाव्यवहितोत्तरत्वंसंबंधतयानिविष्टंनतुप्रकारतया। तेननदोषइतिदीधितिकाराभिप्रायवर्ण
नेनचव्याख्यायांपूर्वापरविरोधः एवंयुक्तिसिद्धतत्तत्साध्यकपरामर्शानुमित्योःकार्यकारणभावस्यदीधितिकारानभिप्रेतत्वंचायुक्तमि
तिनाशंकनीयं। अत्राव्यवहितोत्तरत्वादेःसर्वथासंबंधत्वाभावेतात्पर्याभावात्। एवंचास्यग्रंथस्याव्यवहितोत्तरत्वस्याननुगमप्रयुक्त
संबंधत्वाभावतात्पर्यभ्रमवतांअत्रेदंप्रतिभातिमूलोक्तलक्षणमपिदोषासंस्पर्शी इत्यादिनाव्यवहितोत्तरत्वस्याननुगतत्वप्रतिपादनेनमू
लोक्तलक्षणस्यादुष्टत्वोक्तिरसंगतेवेति ध्येयं। वस्तुतस्तुकार्यकारणभावघटितत्वेनमूलोक्तलक्षणस्यगुरुत्वमितिलघुलक्षणंयुक्तमित्या
भिप्रेत्यप्रमाचतुष्टयस्येकरीत्येवलक्षणंयुक्तमित्यभिप्रेत्यवादीधितिकारस्यलक्षणांतरप्रणयनं। एतेनतत्तल्लिंगकपरामर्शजन्यतावच्छेद
कतयावैजात्यस्वीकारान्नोक्तव्यभिचारःनवासांकर्यं। सांकर्यस्यादोषत्वात्। सजातीयतानपोगपद्यस्वीकारादितिमूलोक्तलक्षणंनोपे
क्ष्यमित्यपिनिरस्तमित्यवधेयंकेचित्तु। अनुमितित्वेनपरामर्शत्वेनसामान्यकार्यकारणभावस्यतत्तद्व्यक्तित्वावच्छिन्नंप्रतितत्तद्व्यले

नविशेषकार्यकारणभावस्यसत्वेपिवह्न्याद्यनुमितिप्रतिवह्निसाध्यकपरामर्शत्वादिनामध्यविध कार्यकारणभावेप्रमाणाभावान्नैतल्लक्षणं
संभवतीत्यस्वरसमाहुः अन्येतु आहार्यपरामर्शादनुमित्यनुदयेनानाहार्यपरामर्शत्वेन हेतुत्वंवाच्यं।तथाचाहार्यत्वस्यतज्ज्ञानत्वरूपतया
तदवच्छिन्नभेदकूटनिवेशेगौरवात्परामर्शानुमित्योस्तद्व्यक्तित्वेनहेतुत्वमेवोचितमितिनास्यलक्षणत्वंसंभवतीत्यस्वरसमाहुस्तदुभयदूष
णभय्यसमल्कृतानुमितिपरामर्शहेतुताविचारदूषव्यंवाधकाभावात्।व्यभिचाराभावात्।अनाकुलंनिर्दोषंआहुरिति।अस्वरसस्तुतादृ
शविषयेप्रमाणाभावएव।लिंगोपहितेतिरतआरभ्यवदंतीत्यंतमेकोग्रंथः केचित्तुलिंगोपहितेत्यादिरपिंक्तिव्याहुः लिंगोपहितेत्यस्या
पमाशयः लिंगानुपधानपक्षेन्यलिंगकानुमितौव्यभिचारस्यतत्तल्लिंगकपरामर्शजन्यतायांतत्तद्व्यवहितोत्तरत्वादिनिवेशस्यात्करी
त्याऽसंभवस्यानुद्धारेपिलिंगोपधानपक्षेव्यभिचाराभावेनकार्यकारणभावघटितमूलोक्तलक्षणंसमंजसमितिवह्निव्याप्यधूमवानप
र्वतोवह्निमानित्यनुमितित्वंवह्निव्याप्यधूमप्रकारतानिरूपितपर्वतत्वावच्छिन्नविशेष्यतानिरूपितवह्नित्वावच्छिन्नविधेयताशाल्यनुमिति-
त्वं।एतत्त्रिकर्षस्तन्यत्रानुसंधेयः।नचानुमितौकेवललिंगभानानभ्युपगमेनैवाव्यभिचारेव्याप्तिभानेमानाभावइतिवाच्यं।नानाविधव्या
प्यवत्ताद्विपरामर्शानांहेतुत्वेनव्यभिचारवारणायतत्तद्व्याप्यवत्ताद्विपरामर्शजन्यानुमितौतत्तद्व्याप्तिभानस्यावश्यकत्वात्।यत्तुलाघ हेतुंब-
वात्साध्याभाववदवृत्तित्वरूपव्याप्यवत्तादिपरामर्शस्यैवानुमितिहेतुतयाव्याप्तिभानेनोक्तयुक्तिःसाधीयसीतितन्न।तस्यैवानुमितिहे

तुत्वेतस्यलिंगभेदेनकारणताभेदाभावेनानुमितौव्याप्तिभानस्येवलिंगभानस्याप्यसिद्ध्यापत्तेःननुलिंगोपधानपक्षस्याचार्यसंमतत्वेन
मूलकारस्यतदसंमतत्वात्तन्मूलोक्तलक्षणस्यतत्पक्षाभिप्रायकत्वंसंदर्भविरुद्धं।वस्तुतस्तु।लिंगोपधानेगौरवमानाभावः।नचसा
ध्यादेरिवनियमतउपस्थितलिंगस्याप्यनुमितौभानेबाधकाभावइतिवाच्यं।वह्निव्याप्यधूमवान्पर्वतोवह्निमानित्याद्यनुमितौवह्निव्याप्य
धूमवान्पर्वतोवह्निव्याप्यधूमवानित्यादिपरामर्शघटितसामग्र्याःप्रयोजकत्वस्यक्लृप्तत्वेनपर्वतत्वाद्यवच्छिन्नविशेष्यकपरामर्शाभा
वदशानुमितेरसंभवात्।नचधूमरूपपर्वतत्वाद्यवच्छिन्नविशेष्यकपरामर्शघटितसामग्र्याअपितादृशानुमितौप्रयोजकत्वंकल्प्यंगौरवात्प्रमा
णाभावाच्च।अधिकमन्यत्रानुसंधेयमित्याशयेनाह।लिंगानुपधानेति।वह्निमत्पर्वतस्येति।तथाचतत्तल्लिंगकतत्तदनुमितिस्वरूपविशेष्यता
संबंधेनपर्वतोवह्निमानित्याद्यनुमितौविशेष्यतासंबंधेनवह्निव्याप्यधूमादिमत्तानिश्चयस्यहेतुत्वमितिभावः।धूमलिंगकानंततत्तदनु
मितिस्वरूपस्यधूमलिंगकयावदनुमितिसाधारणाव्यवहितोत्तरत्वापेक्षयानलघुत्वमतआह।तत्तत्स्वरूपस्येति।क्लृप्तत्वाच्चेति।विषयतायाः
संबंधत्वंसर्वसिद्धं।अव्यवहितोत्तरत्वस्यत्वदुक्तयुक्त्यासंबंधत्वमसिद्धमित्याशयः।वदंतीत्यस्वरसः।सचविषयतायाविषयतात्वेनैवसंबंधत्वं
क्लृप्तंतेनरूपेणकार्यतावच्छेदकत्वेव्यभिचारात्।एवंतत्तत्स्वरूपत्वेनसंबंधत्वंचात्क्लृप्तमेवेत्यादिर्बोध्यः।मूलेव्याप्तिविशिष्टेत्यादिनासकलपरा
मर्शसाधारणपरामर्शत्वजात्यवच्छिन्नजन्यत्वमेवेष्टं।लक्षणत्वेनोक्तमित्याशयवतोमतमाहमानसत्वेति।अन्यथाचाक्षुषत्वादिनासांक

कर्यापत्तेरिति भावः नच स्मृतित्वव्याप्यत्वमादायपविनिगमनाविरहः किं दाप्यननुभूतसाध्यविषयकानुमित्यनुपपत्तेरेवविनिगमकत्वात् घट
परामर्शःघटविषयकपरामर्शःहेतुत्वकल्पने अतिप्रसंगाभावात् तद्धेतुत्वकल्पने। अनुमितित्वस्य तन्मात्रस्य आकस्मिकत्वापत्तिः कारणा
प्रयोज्यत्वापत्तिः कार्यमात्रवृत्तिजातेः कारणप्रयोज्यत्वनियमादिति भावः तादृशनियमस्याप्रयोजकत्वेप्यभ्युपेयसमाधत्ते ज्ञानत्वेनैवे
ति। नच ज्ञानत्वेन हेतुत्वे संयोगत्वादिनाविनिगमनाविरहः परामर्शत्वेन तद्धेतुत्वे परामर्शस्य स्वधर्मिग्राहकमानसिद्धत्वान्नसइतियाच्यं
एवमपरामर्शसंयोगादेर्वाकल्प्यतद्व्यत्रनियामकाभावे न तत्र प्रमाणाभावात्। अत्रापि कल्पमस्मत्कृतानुमितिपरामर्शहेतु
ताविचारेऽनुसंधेयं द्रूहग्रंथगौरवभियानलिखितं तद्व्यक्तीनीति। नच व्यक्तिपदवैयर्थ्यं अनुमितित्वेनानुमितिनिवेशे तस्याएवतादात्म्य
न लक्षणत्वसंभवेव्यक्तिपदवैयर्थ्यात्। विवक्षितइति। अनुभवत्वत्वस्य गुरुतयाऽभावप्रतियोगितानवच्छेदकतया लाघवेन तद्व्यक्तित्वस्यैवा
वच्छेदकत्वादिति भावः अन्यथा गुरुधर्मस्यप्रतियोगितावच्छेदकत्वमतांगीकारेणानुभवत्वावच्छिन्नभेदविवक्षणेविवक्षितत्वे दूतिसंस
त्व तघटितानुभवत्वावच्छिन्नप्रतियोगिताकभेदविवक्षणापेक्षया लाघवेन तद्घटितानुभवत्वत्वावच्छिन्नप्रतियोगिताकभेदस्यविवक्षापि
तुमुचितत्वेयवैयर्थ्यायातादिति इदंचपरोक्षस्य जातित्वाभावमभ्युपेत्य तदनुरोधेपिनससंसंतघटितानुभवत्वत्वावच्छिन्नप्रतियोगिताक हेरेव·
भेदविवक्षणं च प्रक्षालनाद्धीतिन्यायग्रस्तं। तथा च गुरुधर्मप्रतियोगितानवच्छेदकत्वमतानुसारिणि एतल्लक्षणे नासमवेतात्वैयर्थ्यमि।

तिभावः यथा घृ तंतुनसंगच्छते। तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकभेदविवक्षणेनासमवेतांतसार्थक्ये प्रक्षालनाद्धीतिन्यायग्रासस्यदु
दूरत्वात्। लक्षणापत्तेश्च। वस्तुतस्तु विवक्षितद्वितिभावप्रत्ययस्य प्रातिस्विकरूपेणशक्तिवादिनव्यमतेतद्व्यक्तित्वस्यैवत्वप्रत्ययशक्यता
वच्छेदकत्वादितिभावः अन्यथा भावप्रत्ययस्य सर्वत्रेतरावृत्तित्वादिशक्तिवादिसांप्रदायिकमतानुसारेणानुभवेतरत्वादिरूपानुभवत्व
त्वावच्छिन्नभेदविवक्षणेवैयर्थ्यापातादितितथाचनव्यमतानुसारेणैतल्लक्षणेनासमवेतांतवैयर्थ्यमितिभावः शेषंपूर्ववदितिप्रति
भातिकिंचित्तु अनुभवत्वावच्छिन्नभेदनिवेशेपिनासमवेतांतवैयर्थ्यंतथाहि। प्रकृतलक्षणेतद्व्यक्तित्वेनतादात्म्येनतद्व्यक्त्यादिरूपेतस्यैवे
तरव्यावर्त्तकत्वसंभवेनेतरांशवैयर्थ्येनतद्घटितस्यलक्षणत्वासंभवात्। नचतस्यभागासिद्धतयेतरांशसार्थक्यंअसिद्धिवारकस्यव्यर्थ
त्वादितिरूपतदनुमित्यन्यतरत्वमेवतद्व्यक्ति। तथाचरूपनिवेशेपितस्येतरसाधारण्येनतद्व्यावर्त्तकत्वासंभवेनेतरांशसार्थक्येनप्रकृतलक्षणो
पपत्तिः तथाचरूपत्वमेवैदापरूपेतिव्याप्तिवारणायासमवेतांतं। नचानुभवसमवेतत्वमेवास्तु। यथासंनिवेशेऽवैयर्थ्यादित्याहुः अनुमितौ
प्रसिद्धतादृशधर्मसमवायित्वस्यकालिकसंबंधेनकालादौसत्वादतिप्रसंगतादवस्थ्यमतआहतथाचेतिगौरवादिति। अनुभवत्वजात्य
नांगीकारेऽनुभवत्वस्यस्मरणान्यज्ञानत्वरूपत्वादितिभावः। सुवचमिति अनुभवत्वाप्रमात्वानुभवान्यासमवेतत्वरूपविशेषणद्वयमपेक्ष्य
प्रत्यक्षासमवेतत्वरूपैकविशेषणघटितत्वेनलाघवमेवमोष्टंयं। तथापीत्यादि। अयमाशयः प्रत्यक्षाद्यसमवेतत्वनिवेशेऽनुमितिलक्ष

णत्वसंभवेपिप्रत्यक्षादिलक्षणत्वासंभवः अथ एतद्व्यक्तिसमवेतयावद्धर्मसमवायित्वमप्युपेक्षितं तद्व्यक्तिपदेन चाक्षुषादिप्रत्यक्षव्यक्त्यु
पादनितत्समवेतयावद्धर्मान्तर्गतत्वचाक्षुषत्वादेः स्यार्द्धनादावसत्तेनाव्याप्त्येतस्य प्रत्यक्षत्वलक्षणत्वासंभवात्। अथ तथाप्युक्तलक्षणा
पेक्षया लघुतरस्य तत्तद्व्यक्तिसमवेतानानुभवनिष्ठभेदप्रतियोगितावच्छेदकधर्मसमवायित्वस्य प्रमाचतुष्टयलक्षणत्वसंभवेन कुतस्त्या
गः अतएव पूर्वमनुभवत्वव्याप्यत्वमनुभवतिष्ठभेदप्रतियोगितावच्छेदकत्वरूपं व्याप्यविषयकत्वघटितलक्षणेनिवेशितं नत्वनुभवत्वव्या
प्यत्वमनुभवतिष्ठभेदप्रतियोगितावच्छेदकत्वरूपं व्याप्यविषयकत्वघटितलक्षणेति। न्यानुभवान्यासमवेतत्वरूपभेदगर्भव्याप्यत्वमितिचेन्न
।याधारप्रतियोग्यतावच्छेदकप्रत्यक्षव्यावृत्तानुमित्यादिसाधारणपरोक्षत्वादिवैजात्यमादायातिप्रसंगात्। नचानुभवत्वजात्यासांकर्यान्न
न परोक्षत्वादिजातिरत एव व्याप्यविषयकत्वघटितलक्षणेपि नतामादायातिव्याप्तिरिति वाच्यं एतल्लक्षणस्य मूलानुसारित्वेन सां
कर्येपि क्वचित्प्रमाणसिद्धजातिः स्वीक्रियात इति वोद्धपिकारस्य स्वयं व्यवस्थापितत्वेनैतल्लक्षणस्य तदभिप्रायकत्वात्। व्याप्यविषयकत्वघ
टितलक्षणस्य तु मूलानुसारितया तादृशाभिप्रायकत्वासंभवे नेमादृशवैजात्यस्याभावेनैवानतिप्रसक्त्या लाघवेन भेदगर्भव्याप्यत्वत्या
गः इष्टत्वगत्या गुर्वपि भेदगर्भव्याप्यत्वमेवाश्रीयत इति। एतेन प्रत्यक्षाद्यसंभवेनत्वघटितस्य प्रमाचतुष्टयलक्षणत्वासंभवेपि तद्व्यक्ति हेरंब
समवेतयत्किंचिदनुभवासमवेतधर्मसमवायित्वमित्येकशब्देन प्रमाचतुष्टयलक्षणसंभवात् तथानभिधानबीजानुयोगस्यक्तावतादृष्यरू

त्वमितिकेषांचिदत्रदूषणदानंपरास्तं।उक्तवैजात्यमादायातिप्रसक्तेरेतस्यापिप्रमाचतुष्टयलक्षणत्वासंभवात्।नचैवमनुभवत्वावच्छि
न्नभेदनिवेशोपिपरोक्षत्वावारणायासमवेतांतस्यसार्थक्येपैयर्थ्यापातादितिपूर्वोक्तविरोधइतिवाच्यं।तस्याभ्युपगमवादपरत्वेनमुख्यतो
लाघवएवतात्पर्यस्योपवर्णितत्वादितिदिक्।तथैवेति।तज्जन्यतावच्छेदकावच्छिन्नजनकत्वस्यव्यापारत्वघटकतायाअन्यथादंडादेर्भ्रमिद्वा
रावीश्वरतानादिव्यापारतापत्तेरित्याशयः।व्याप्तीत्यादि।तथाचैतन्मतेव्याप्तिस्वविशिष्टपक्षधर्मताचव्याप्तिविशिष्टपक्षधर्मतेतयोर्ज्ञानमि
तिविग्रहः।वैशिष्ट्यंचपूर्वोपस्थितव्याप्तेरेवेतिभावः।कार्यतावारणायेति।तादृशकार्यतायाअवारणेतत्समानाधिकरणप्रत्यक्षत्वाद्यादा
यातिप्रसंगात्।एवमग्रेपिव्याप्तिज्ञानत्वावच्छिन्नेति।नचतथाप्युक्तकार्यतायाअवारणंतत्प्रतियोगिवह्निव्याप्यधूमवत्पर्वतनिश्चय
कारणतायावह्निव्याप्तिप्रकारतानिरूपितपर्वतविशेष्यताशालिनिश्चयत्वेनेवपर्वतनिश्चयत्वकारणतायावह्निव्याप्तिप्रकारतानिरूपि
तपर्वत्वेनेवपर्वतविशेष्यतानिरूपितधूमप्रकारतानिरूपितव्याप्तिप्रकारताशालिनिश्चयत्वेनापिविनिगमनाविरहेणावच्छिन्नतयास्त्विति धिकं
नायेनव्याप्तिज्ञानत्वावच्छिन्नत्वादितिवाच्यं।व्याप्तिज्ञानत्वपर्याप्तावच्छेदकताकत्वस्यविवक्षितत्वात्।अवच्छिन्नत्वमन्यूनवृत्तित्वं।उक्तकार्य
ताप्रतियोगिकारणतायाव्याप्तिज्ञानत्वन्यूनवृत्तितयानदोषइत्यपिकश्चित्।तत्रहिउक्तस्थलेहि।अत्रापिअनुमितावपिनैकमिति।तथा
चासंभवइतिभावः।पक्षेत्यादि।तथाचव्याप्तिज्ञानजन्यतायांधूमपरामर्शाद्यव्यवहितोत्तरत्वपर्वतविशेष्यकत्वाद्यनिवेशेपिनक्षतिरि

तिभावः। तादृशावच्छेदकेति व्याप्तिज्ञानत्वावच्छिन्नकारणताप्रतियोगिककार्यतावच्छेदकेत्यर्थः। अतिव्याप्तिरिति धारणापतत्त्वच्छेदकाव
च्छिन्नेत्यत्र एकधर्मावच्छिन्नपर्याप्तिनिरूपकतावच्छेदकत्वं विवक्षणीयं न्यूनाधिकपदार्थावच्छिन्नोक्तजन्यतयोरवच्छेदकते च नैकधर्मावच्छि
न्नपर्याप्तिके न्यूनाधिकतावत्पदार्थवृत्ति समुदायत्वाभ्यामेव त्वेतत्पर्याप्तेरवच्छेदकत्वादिति नातिप्रसंगः। एवं च व्याप्तिज्ञानपरामर्शजन्यतयो
र्विभिन्नधर्मावच्छिन्नत्वे संभवो दुरुद्धर एवेत्युपदर्शितदिशा व्याप्तिज्ञानजन्यतायां धूमपरामर्शाद्यव्यवहितोत्तरत्वादिनिवेशः सामग्री रूपे
वा संभवो वारणीय इत्याशयः एवमिति। अस्यापि पूर्वोक्तं तात्पर्यं दूस्यादीति। आदिना ज्ञानत्वेन मनस्त्वेन वा करणत्वे संभवन्व्याप्त्यवि
षयकत्वनिवेशेनैवानतिप्रसंगे यथोक्तगौरवं चेत्यस्य परिग्रहः पूर्वोक्तयावद्व्याख्यासु पक्षताया उपलक्षणतयाप्रवेशेन तज्जन्य
त्वालाभात्तल्लाभायाह। दीधितौ। पक्षधर्मतेत्यत्रेति। प्रतिज्ञाद्यघटकत्वं पक्षतान्वयि समभ्या अर्थः इदमभ्युक्तलक्षणवाक्यं पक्षधर्मत
त्वे तावन्मात्रे पक्षस्याविशेषणत्वेन वक्ष्यमाणार्थलाभ अत आहः व्याख्यायां पक्षत्वेति। यथाश्रुतविशेषणत्वे तथैवेत्यत आह।
पक्षत्वस्येति विशेष्यैति अहणये स्यादावाहुरित्यादीनामिव प्रकृते पक्षताया विशेषणत्वमिति भावः। एवं सति पक्षताया धर्मतायामन्व
यः स्यान्न तु जन्यतायामत आह पक्षधर्मतेति। विशेष्यत्वं साक्षात्संपरया साधारणमिति भावः। पक्षतायाः परंपरया विशेष्यं ज्ञानमादा हेत्व·
यतन्यतान्वयेन तु धर्मतायाः साक्षाद्विशेष्यं तदाशयतत्स्वपदद्वयत्र नियामकमाहुतात्पर्येति। अविशेषणत्वेपि विशेषणत्वेन

उयामनन्वयेपि पक्षताया एव धर्मताविशेषणपक्षविशेषणीभूताया।ऽअपिपक्षताया इतिचार्थः नन्वरुणेयेकहायन्यापिंगाक्ष्या गवासो
मंक्रीणातीत्यत्र साक्षाद्विशेष्यगवादीनां क्रयसाधनत्वभावेनविशेषणस्यारुण्यादेःसाधनत्वंभासतां प्रकृते च तादृशविशेष्यस्यपक्षस्याज
नकत्वेविशेषणस्यजनकत्वंकथंभासतां द्वारभावादितिचेन्न। तत्रारुण्यादेःसाक्षात्क्रयसाधनताभावेन द्वारापेक्षायामप्यत्र पक्षताया
स्साक्षादेवजनकत्वेन द्वारानपेक्षणात्। परंपरया विशेष्यान्वयिनान्वयित्वरूपविशेषणत्वं क्वदृष्टमित्यपेक्षायामाह लोहितेति। यत्रत्यास
र्यवगात्तस्यनिरुक्तविशेषणत्वाभावेपि साक्षात्परंपरया वा तद्विशेषणस्य निरुक्तविशेषणत्वेनान्वयेस्यत्वमाह लोहितेति प्राप्तत्वात्। सोल्ली
षाऋत्विजः प्रचरंतीत्यादिविधिवाक्यादिष्टसाधनत्वेन प्राप्तत्वात्। अविवक्षितस्यापि इष्टसाधनतान्वयित्वेनाविवक्षितस्यापितस्योल्लीषस्य
विशेषणत्वेपक्ष्यर्थः चकथितस्यविशेषणीभूतत्वेलोहितस्येतिपाठः स्वरसुगमएवदंडीतिषा। नन्वाहेत्यत्र पुरुषस्याविधेयत्वेपिदंडस्यविधेयत्वव
त्ववत्स्वर्गीस्यामित्यत्रविशेष्यस्यकाम्यत्वाभावेपिविशेषणस्यकाम्यत्ववच्च सामान्यतो विशेष्यान्वयेपिविशेषणस्यान्वयइतिव्युत्पत्तेः लोहि
तोल्लीषाद्युसादौ रूपत्वादितिभावः कश्चिदिति। अस्वरसबीजं तु पक्षतायाः सहकृतत्वसंबंधेन प्रथमज्ञानेस्यात्तं न्येण विशेषणत्वेगौरवं। नन्वी
त्वरीत्वरीत्यापक्षतायाःपरंपरयाविशेष्यधर्मतान्वयित्वे ज्ञानेसहकृतत्वसंबंधेनान्वयित्वरूपविशेषणत्वेनैवतल्लाभेनस्यात्तंन्येणविशेषणत्वमि
तिवाच्यं। ज्ञानपदोपसंवरादनविषयस्यज्ञानेविषयत्वसंबंधेनान्वयस्यव्युत्पन्नतयापक्षधर्मतायाइवपक्षताया अपि ज्ञानेविषयतयान्वयसंसं

संभवेः पारतंत्र्येणान्वयस्वीकारे तु विशेष्यान्वयिनान्वयितस्यैवस्वीकारादिति। परामर्शजन्यविशिष्टस्मरणतादृशापक्षाभावप्रत्यक्षादावनिव्या
प्तिवारणरूपपक्षताजन्यत्वोपादानप्रयोजनं स्फुटत्वादुपेक्ष्य परामर्शजन्यत्वोपादानप्रयोजनमाह। दीधितौ पथोक्ताया इति। व्याख्यायां का
लादीति। एककालावच्छेदेनैकात्मवृत्तित्वरूपवैशिष्ट्यस्य कालघटितत्वादिति भावः। अत्रातींद्रियत्वे दुर्ज्ञेयत्वं तेनादिनानुगतानुनुगतानुमितित्वा
भावकूटपरिग्रहः पक्षतायां विशिष्टाभावरूपत्वेन विशेष्याद्यभावरूपत्वमनुपपन्नमत आह विशेषणवतीति। अनुगताकारत्वेनैत्या विशिष्टा
भावस्यातिरिक्तत्वं शवमांशे कापा अतिरिक्तत्वाभिप्रायकत्वं समाधानस्यानतिरिक्तत्वाभिप्रायकत्वमिति संदर्भविरोधे नातिरिक्तत्वाभिप्रायेणे
वोभयोपपत्तिः उक्तिस्वारस्येनाह विशिष्टेति। परामर्शोपादानमिति। अत्र वैदंति विशिष्टाभावस्यातिरिक्तत्वे तद्घटितलक्षणकरणादेवा
नतिप्रसंगे परामर्शोपादानं व्यर्थं। न चैवं विशेष्याद्यभावरूपपक्षताजन्यानुमितौ व्याप्तिरिति वाच्यं। जातिघटनाया आवश्यकत्वेना
दोषादिति तात्पर्यं। लक्षणे विशिष्टाभावरूपपक्षताजन्यत्वान्निवेशगौरवेण विशेष्याद्यभावरूपपक्षताजन्यत्वस्यैव लाघवेन नि
वेशे तत्प्रसक्षवारणाय यं परामर्शोपादानस्य। विस्यातम्। फलमुखगौरवस्यादोषत्वात्। अत्रेदं चिंत्यं व्याप्तिविशिष्टपक्षधर्मताज्ञान
रूपपरामर्शजन्यत्वोपादान एवोक्तरीत्या पक्षतायाजन्यतायां विशेषणत्वेनान्वयात् पक्षताजन्यत्वस्य लक्षणवाक्याल्लाभः तदनुपादाने त हेरंब·
तः पक्षताजन्यत्वस्यैवालाभेन पक्षताजन्यत्वस्य पक्षताप्रत्यक्षेऽतिप्रसंगवारणाय परामर्शोपादानमिति कथं दीधितावुक्तं। अन्यथा

पक्षतात्वेन पक्षताजन्यत्वस्यातिप्रसक्तत्वेन परामर्शोपादानस्य तत्त्वेनेत्यादिग्रंथासंगतेर्दुरुद्धरत्वात्। यद्यपि चोक्तरीत्या पक्षतायाजन्यतायां विरो-
षणत्वेनान्वयमहिम्ना लक्षणवाक्यात्पक्षताजन्यत्वमात्रस्य लाभेपि पक्षतात्वेन पक्षताजन्यत्वस्य लक्षणवाक्यान्न लाभ इत्युच्यते तदा प-
रामर्शानुपादाने पक्षताजन्यत्वमात्रस्यापि लक्षणवाक्यात्कथं लाभ इति तुल्यं नच व्याप्तिविशिष्टेत्यादिलक्षणवाक्ये लघुपक्षतापरामर्शो-
भयजन्यत्वरूपलक्षणे परामर्शोपादानकृत्यपरोयं ग्रंथ इति वाच्यं। तथापि पक्षतायाः पारतंत्र्येण जन्यतान्वयमहिम्ना वस्तुगत्या परामर्शज-
न्यत्वसमानाधिकरणपक्षताजन्यत्वस्यैव लक्षणत्वेन परामर्शोपादानासंगतेरपरीहारादिति। जन्यत्वे स्वनिष्ठजनकतानिरूपितत्वसंबंधेनैव
पक्षताया अन्वये नान्वयेन लघुपक्षतात्वावच्छिन्नजनकतानिरूपितत्वसंबंधेन प्रयोजनविरहात् किंतु परामर्शत्वेन जनकत्वं विवक्षितमित्याश-
येनाह। दीधितौ। तत्त्वेनेति व्याख्यायां तच्चेत्यादि। तत्प्रदर्शनं च परामर्शसत्त्वेऽनुमितिरेव भविष्यति न तु पक्षताप्रत्यक्षं भिन्नविषयेऽनुमितिसाम-
ग्र्या बलवत्त्वात्। जातायां चानुमितौ न तत्प्रत्यक्षसंभवः तदानीं तदभावात् तद्विषयस्य कार्यकालवृत्तितया हेतुत्वात्। तथा च कथमतिव्याप्तिरित्या-
शंकापरिहाराय सिद्ध्यभावजन्यतेति विषयतया सिद्ध्यभावजनकतानिरूपितजन्यतेत्यर्थः तल्लौकिकेति नच मानसायोग्यवह्न्यादिघटितध-
र्मावच्छिन्नप्रतियोगिताकाभावरूपपक्षतायास्तत्त्वेन लौकिकप्रत्यक्षं न संभवतीति वाच्यं मानसायोग्यवह्न्याद्यंशेऽलौकिकस्यतानाभावां-
शे लौकिकस्य प्रत्यक्षस्य संभवात्। सुखादिसाध्यघटितलक्षणकरणेन सुखादिसाध्यकपक्षतात्वेन तल्लौकिकप्रत्यक्षमादाय व्याप्तितोभासया

द्यं। अत एवानुपदं सुखव्याप्येत्यादि वक्ष्यति न त्वत्रैव व्यक्तीभविष्यति। मिश्रादीनामिति दीधितिकारमते प्रतियोगितावच्छेदकप्रकारकप्राति
योगिनिश्चयत्वेनाहेतुत्वादित्युक्तं तथा च निरुक्तपक्षताप्रत्यक्षविषयतया पक्षतायाः सिद्धित्वप्रकारकसिद्धिज्ञानत्वेन परामर्शजन्यत्वेपि परामर्श
त्वेन परामर्शजन्यत्वाभावान्नातिप्रसंग इति भावः मान्यास्तु घटभेदभेदत्वादिनैव बाध्यादिसाध्यकपक्षताप्रत्यक्ष एवातिव्याप्तिवारणाय परा
मर्शोपादानं ईश्वरीयपरामर्शजन्यत्वेन तत्रातिप्रसंगतादवस्थ्यात्तत्वेनेत्यस्योपादानमित्याहुः। एकावच्छेदेनेत्यस्येति। न चास्य लक्षणवाक्याद
लाभः पक्षताजन्यत्वे सति परामर्शजन्यत्वमित्यनभिधाय व्याप्तिविशिष्टेत्याद्यभिधानेन एकजन्यतायां तदुभयायत्ताभावेपि एकधर्मावच्छिन्नत्वला
भात् परामर्शत्वेनेति मध्यविधकार्यकारणभावे प्रमाणाभावेन तस्याभावादिति भावः एतेन तस्य मिश्राभ्युपगतत्वात्तन्मते तमादायैकमध
र्मावच्छिन्नत्वनिवेश इत्ययास्तं। अभ्युपगमस्यैवासंभवात् समूहालंबनेनेति तत्र विषयतया पक्षतायाः प्रतियोगितावच्छेदकप्रकारकप्रतियो
गिज्ञानविधया विशेषणतावच्छेदकप्रकारकज्ञानविधया वा परामर्शत्वेन परामर्शस्य च जनकत्वादिति भावः न हेतुत्वं मिश्रमते न हेतुत्वं। व
स्तुतस्तु विशिष्टवैशिष्ट्यविषयताया अनुभवसिद्धत्वेनोक्तहेतुत्वस्याप्यंगीकारणीयत्वात् समूहालंबनेनेति प्रसंगोस्त्येवात्तरौ एवं यदि चेत्यु
क्तो। अभावोपनीतेति उक्तसमूहालंबनस्य लौकिकमानसायोग्यवह्निव्याप्यधूमवत्पर्वताभावांशे ऽलौकिकत्वेनन्न तत्र प्रतियोगितावच्छेद हेरंब·
कप्रकज्ञानविधया परामर्शजन्यत्वं तद्विधया जन्यतायां लौकिकत्वनिवेशादिति भावः। तदेसादित्र अस्य च लौकिकमानसयोग्यभेदवि

षयकत्वेनसंवर्गशेलौकिकत्तपाविषयतयापक्षताजन्यत्वस्यप्रतियोगितावच्छेदकप्रकारकाधीविपधपापरामर्शत्वेनपरामर्शजन्यत्वस्यच
सत्वादितिव्याप्तिःस्फुटैवानचव्याप्तेरयोग्यत्वेनतदवच्छिन्नभेदस्याप्ययोग्यत्वमितिवाच्यं। प्रतियोगिसत्वेत्यादियोग्यानुपलब्धिसत्वेनपि
शाचत्वाद्यवच्छिन्नभेदस्येवास्यापियोग्यत्वात अतएवात्यंताभावकपेक्षितः पिशाचात्यंताभावस्येवतस्यापियोग्यत्वात्। परंतुदुःखपदस्यतदुःख
परत्वेनतदुःखघटितव्याप्तेर्योग्यत्वमिति तन्नतस्या अप्यतींद्रियाभावघटितत्वेनायोग्यत्वात् निरानुधावनवैयर्थ्यापाताच्च अतएवसाध्यसं
बंधितावच्छेदकरूपवत्वादिव्याप्तेर्योग्यत्वेनतदभिप्रायेणेदमित्याभिप्रायनिरस्तं। अत्रपद्यपिलौकिकमानसायोग्यवत्वाद्विव्याप्यवत्वस्वविषयक
निश्चयत्वरूपपरामर्शत्वावच्छिन्नकारणतायाएवलक्षणेनिवेशनीयतयासुखव्याप्यदुःखवदात्मरूपप्रतियोगिज्ञानजन्यतामादायनातिव्याप्त्य
वकाशः नचसुखाद्यनुमितावव्याप्तिः जातिघटितायाअवश्यकत्वेनतद्भावात्। तथापिपरामर्शसामान्यस्येवलक्षणेनिवेशेनतादृशपरा
मर्शत्वावच्छिन्नकारणतायाअपिलक्षणेनिवेशाभिप्रायेणायाततस्तदुभयसमूहालंबनइतिग्रंथस्याभिप्रायवर्णनमिदंवस्तुतस्तदपिनाद्वि
सक्षिप्यत्रास्वरसवीजमित्यनुपदमेवस्फुटीभविष्यति। अफलमिति। तथाचैकावच्छेदेनतदुभयजन्यत्वासंभवादसंभवः नचान्यलिंगकानुमि
तौव्यभिचारवारणापपरामर्शजन्यतायामिवान्यलिंगकेच्छाकालेसिद्धिकालीनतल्लिंगकपरामर्शादनुमितिवारणायतत्तल्लिंगकेच्छाविरह
विशिष्टसिद्ध्यभावरूपपक्षताजन्यतायां तत्तल्लिंगकत्वनिवेशनमावश्यकमितिवाच्यं। अन्यलिंगकेच्छायाः प्रतिबंधकत्वमभ्युपेत्यपक्षतायालिं

गमेहानियंत्रितत्वस्यापिपक्षताग्रंथेवक्ष्यमाणत्वात् उक्तरीत्याविशिष्टरीत्याद्यभावरूपपक्षतायाएतत्क्षणेनिवेशेनतज्जन्यतायांत
न्निवेशाभावाच्च। तथावच्छेदकतापर्याप्त्यनिवेशेनपक्षताजन्यतायांतत्तल्लिंगकत्वाप्रवेशेपीतरांशमादायतत्संभवइतिवाच्यं। उक्तसमू
हालंबनेपक्षतापरामर्शजन्यतयोः प्रत्यक्षत्वरूपैकधर्मावच्छिन्नत्वेनातिव्याप्त्यापत्त्यापर्याप्तिनिवेशस्यावश्यकत्वात्। यत्तुपक्षताज
न्यतावच्छेदकतापर्याप्त्यधिकरणघटितधर्मावच्छिन्नपरामर्शजन्यत्वमेवतदतानासंभवः नह्यत्रपर्वतोवह्निमानितिसिद्धिकालेनीलपर्वतोव
ह्निमानित्याद्यनुमित्युत्पत्त्यापर्वतत्वाद्यंशोद्देश्यतावच्छेदकत्वपर्याप्तिः परामर्शजन्यतायामप्रविष्टायाः पक्षताजन्यतायांनिवेशनेनै
नैतदपीतिवाच्यं पक्षतापरामर्शयोः सहकारितानिर्वाहायैवपरामर्शजन्यतायामपितन्निवेशात् अन्यथापयोर्जन्यतावच्छेदकयोर्व्या
प्यव्यापकभावस्तयोरेवपरस्परसहकारित्वमितिनियमभंगापत्तेरितितन्निरस्तं। जन्यतावच्छेदकसामानाधिकरण्यस्यैवपरस्परसहकारिता
यानियामकत्वेन अन्यव्यवस्थापितत्वे ननतादृशनियमेमानाभावात्। विषयत्वावच्छिन्नपक्षतानिरूपितप्रमाणभिन्नमित्यर्थः तन्मतेऽलीका
धिकरणकासत्ताभावस्यानभ्युपगमेपिअलीकाधिक रणजनकतानिरूपितजन्यतावच्छेदकतापर्याप्त्यधिकरणत्वेकिंकृत्प्रत्यक्षत्वावच्छिन्न
परामर्शजन्यत्वस्योक्तसमूहालंबनेसत्वेनातिप्रसंगस्यदुरुद्धरत्वाच्च। किंचैवपक्षताजन्यतेस्यत्राभावजन्यतेत्यैवास्तुकिंपक्षतात्वपर्यंतनि हेत्व·
वेशेन। नचैवंवह्निव्याप्यधूमाभाववान्पर्वतइतिबाधाभावमादायविशिष्टवैशिष्ट्यबोधेऽतिव्याप्तिरितिवाच्यं वह्निव्याप्यधूमप्रकारता

निरूपितपर्वतविशेष्यताशालित्वस्य बाधाभावजन्यतावच्छेदकत्वेन तादृशपर्वतप्रकारताशालित्वस्य च परामर्शजन्यतावच्छेदकत्वेना
दोषात्। न च पर्वतोऽवृत्तिरित्यादिबाधाभावजन्यतावच्छेदकपर्वतप्रकारताशालित्वमादाय तद्दोषतादवस्थ्यमिति वाच्यं जन्यताव
च्छेदके विशेषाद्यजन्यत्वस्याधिकस्य निवेशात्। इति वक्ष्यमाणत्वादिति यत्किंचित्पक्षताजन्यतायां विषयितासंबंधेनावच्छेदकं पाक्षतद्वच्छिन्नप
रामर्शजन्यत्वं तद्विशिष्टपक्षस्यापि विषयतया सिद्ध्यभावात्मकपक्षताजन्यतावच्छेदकत्वेऽपि तासंभवः। अत्र च वह्निव्याप्यधूमाभाववानयं
तद्वृत्तिबाधाभावजन्यतावच्छेदको विशेष्यतया विशिष्टपक्षः प्रकारतया तद्वच्छिन्नाच्च विशिष्टवैशिष्ट्यबोधीयपरामर्शजन्यतेत्यतिव्या
प्तिवारणाय भावत्वं विहाय पक्षतात्वोपादानं। नायं दोष इति परेषां तरंत्वस्यैव तथाहि लाघवेन वह्निसाध्यकपरामर्शत्वावच्छिन्नजन्यताया
एवल्लक्षणे निवेशो वित्त्येन सुखेत्याद्युक्तसमूहालंबने। अतिप्रसंगाभावेनैकावच्छेदेने यस्य चैयर्थ्यं पक्षत्वेन पक्षताजन्यत्वविवक्षणेनैवान
तिप्रसंगे सकलत्वचैयर्थ्यं च। तद्भावाप्रकारकज्ञानत्वरूपनिश्चयत्वस्य तदभावप्रकारकांतीद्रियेश्वरज्ञानघटितत्वेनायोग्यतया तद्घटितसि
द्धित्वावच्छिन्नाभावस्याप्ययोग्यत्वेन तद्विपक्षणेऽपि तत्वेनेत्यादेर्वैयर्थ्यं च एतेन वह्निव्याप्यधूमवानयं पर्वतो नास्ति सिद्ध्यभावश्चेति समूहा
लंबने। अतिव्याप्तिः विशेषणतावच्छेदकप्रकारकधीमुद्रया वह्निसाध्यकपरामर्शजन्यत्वादिति परास्तं। तत्र पक्षताजन्यत्वाभावात्। एवं ज
न्यतायामभावाविषयकवृत्तित्वनिवेशेनैवानतिप्रसंगे पक्षताजन्यत्वादिनिवेशो। पिगौरवमिति। यत्तु परामर्शस्य तत्तेनाजनकत्वेन

पक्षतायाञ्च हेतुत्वेन न चासंभवश्चिंताबीजमिति तत्र परामर्शत्वेन जनकत्वस्यान्यत्र व्यवस्थापितत्वात् पक्षताया हेतुत्वस्यापि पक्षतायां
व्यवस्थापनीयत्वात् पक्षतापरामर्शयोर्जन्यतायां विषयतावच्छेदकस्यापि नैक्यमित्यसंभवदुःस्थाशयेनाशंकते न चेति। पक्षता
वच्छेदकसामानाधिकरण्यमात्रेति। सामानाधिकरण्येन सिद्धिकालीनावच्छेदकावच्छेदेनानुमितौ व्यभिचारवारणाय मात्रपदं। पर्वत
त्वावच्छिन्ने स्यादि। पर्वतत्वावच्छेदकत्वावगाहिपरामर्शस्य पर्वतत्वसामानाधिकरण्यावगाहिपरामर्शस्य परामर्शमात्रस्येति यावत्। पर्वत
विशेष्यकवह्न्यनुमितित्वं कार्यतावच्छेदकमित्यनुषज्यते। तथा च सामानाधिकरण्येन सिद्ध्यभावपरामर्शयोः प्रकृते निवेशो न संभवती
ति भावः। अनुपरामर्शद्वयस्यानुगमकाभावेन भिन्नरूपेण जनकतया जन्यतावच्छेदकैक्ये व्यभिचारं दूषयत आह पर्वते त्वेति। तत्सामानाधि
करण्यावगाहित्वेनेति। तथा चेदमेवानुगमकं रूपमिति भावः। व्यभिचाराभावात् अवच्छेदकावच्छेदेनानुमितौ व्यभिचाराभावात्। अवच्छेद
केत्यादि। अत्र सामानाधिकरण्यावगाहीत्यनेन तत्त्वेन द्विविधपरामर्शयोरेकमेव हेतुत्वमिति सूचितं। एवकारेण सामानाधिक
रण्येन सिद्ध्यंशे नैनं तत्त्वे भावव्यवच्छेदः। अत्र सामानाधिकरण्यमात्रावगाहित्वस्यावच्छेदकत्वानवगाहित्वे सति सामानाधिकरण्या
वगाहित्वरूपतया विषयाधिक्याभावेन विषयतावच्छेदकैक्यस्याक्षततया सामानाधिकरण्येन सिद्ध्यभावनिवेशेऽपि न दोष इति किं तद्य हेरंब·
वच्छेदेनेति न शंक्यं तादृशसिद्ध्यभावकार्यतावच्छेदकं सामानाधिकरण्यमात्रावगाहित्वं हि नोक्तरूपं यथाकथंचिदवच्छेदकत्वावगाहि

न्याः शुद्धसाध्यतावच्छेदकसंसर्गकसम्बद्धत्वेनानुमितेरप्रतिबध्यत्वापत्तेः किंतु अवच्छेदकत्वानवच्छिन्नसामानाधिकरण्यावगाहित्वं अवच्छेदके
त्वावच्छिन्नत्वं च अवच्छेदकत्वस्य पक्षतावच्छेदके भानमिति मते अवच्छेदकत्वविषयतावच्छिन्नविषयताकत्वं अवच्छेदकत्वस्य साध्यतावच्छे
दकसंबंधघटकतया भानमिति मते यथाश्रुतमेव समूहालंबनव्यावृत्तेः। एवं च प्रकृतलक्षणे विषयतावच्छेदकैक्यं पक्षताजन्यतायां ये
नरूपेणावच्छेदकत्वं परामर्षजन्यतायां तेनरूपेणावच्छेदकत्वमवश्यं वाच्यं अन्यथा च वह्निव्याप्यधूमवान्पर्वतो नास्तीति सिद्ध्यभावश्चेत्यादिस
मूहालंबने ऽतिव्याप्तितादवस्थ्यात्। ज्ञानादिप्रत्यक्षे ज्ञानत्वादिनेत्युक्तदिशा ऽभावप्रत्यक्षे ऽभावत्वेन हेतुतया पक्षताजन्यतायामभावत्वे
न विषयतावच्छेदकस्य वह्निव्याप्यधूमवत्पर्वताभावस्य परामर्षजन्यतायां विशेषरूपेण विषयतावच्छेदकत्वात्। तथा च तादृशसिद्ध्यभावनिवे
शे तज्जन्यतायां सामानाधिकरण्यस्यावच्छेदकत्वानवच्छिन्नसामानाधिकरण्यत्वेन विषयतावच्छेदकत्वं परामर्षजन्यतायां सामानाधिकर
ण्यत्वमात्रेणेति नोक्तविषयतावच्छेदकैक्यमित्यस्य दुरुद्धरतया तद्व्यवच्छेदस्यावश्यकत्वमित्याशयात्। केचित्तु विषयतावच्छेदकैक्यं हि न ता
दृशविषयाणां तत्तद्व्यक्तित्वेनाभेदः तेषां परस्परं भिन्नत्वात् किंतु तादृशावच्छेदकत्वेनैक्यं तच्चोपदर्शितपक्षताजन्यतावच्छेदकत्वावच्छेदेनोपद
र्शितपरामर्षजन्यतावच्छेदकत्वावच्छिन्नभेदश्चान्यत्वे सति ऽपदर्शितपरामर्षजन्यतावच्छेदकत्वस्य समानाधिकरण्यमात्रावगाहत्वनुमि
तिमात्रविषयसंयोगवृत्तित्वेन परामर्षजन्यतावच्छेदकत्वस्य तु पर्वतविषयकवह्निविधेयकानुमितिसामान्यविषयसंयोगवृत्तित्वेन पक्षता

मर्षजन्यतावच्छेदकत्वविशिष्टेऽवच्छेदकतावगाह्यनुमितिविषयसंयोगितादृशपक्षताजन्यतावच्छेदकभेदसत्तादित्याहु अवच्छेदकत्वावगा
ह्यनुमितेः सामानाधिकरण्यानवगाहित्वेनासंग्रहापत्त्यानोक्तरूपस्योभयजन्यतावच्छेदकत्वसंभव इत्यत आह। अवच्छेदकेति। नत्ववच्छेदका
वच्छिन्नसिद्ध्यभावस्याप्यवच्छेदकत्वावगाह्यनुमितिजनकतासामानाधिकरण्यमात्रावगाह्यनुमितिजनकतापि तीद्वयोः पृथगेव जनकत्वानु
रोधेन जन्यतावच्छेदकभेदस्यावश्यकतया कथमुक्तरूपस्य जन्यतावच्छेदकत्वं एवं द्विविधपरामर्षस्योक्तरूपेणैक जनकत्वे सामानाधिकरण्य
त्वसिद्ध्यभावजन्यतावच्छेदकसामानाधिकरण्यमात्रावगाह्यनुमितित्वावच्छिन्ने सामानाधिकरण्येन वा धर्मेवजन्यतावच्छेदकत्वच्छेदकतावगा भा
ह्यनुमितित्वावच्छिन्ने च नियामकालाभः एवं द्विविधपरामर्षसाधारणानिश्चयत्वस्य दुर्वचत्वया द्विविधपरामर्षीयाप्रामाण्यग्रहोत्तेजकत्वा
नुरोधेन च तस्यैकरूपेण जनकत्वासंभवश्चे त्यत आह दिगिति इद्वयोरेकरूपेणैवोत्तेजकत्वानुरोधेन च तस्यैकरूपेण जनकत्वासंभवश्चे
त्यत आह दिगिति इद्वयोरेकरूप/ अन्यादृशेच्छाकालेऽन्यादृशानुमित्यापत्तिस्तत्तत्स्याः प्रतिबंधकत्वेन निरसनीयेति नाद्यो दोषः अवच्छे
दकावच्छेदेन वाधाभावसिद्धिसामान्याभावादिसहकृतसामानाधिकरण्यावगाहिपरामर्षत्वावच्छिन्नस्य सामानाधिकरण्यमात्रावगा
ह्यनुमितित्वावच्छिन्ननियामकत्वं अवच्छेदकावच्छिन्नसिद्ध्यभाववाधसामान्याभावादिसहकृतस्य तस्यैवावच्छेदकत्वावगाह्यनुमिति हेरेव
त्वावच्छिन्ननियामकत्वमिति न द्वितीयो दोषः। मिश्रमते निश्चयत्वस्याव्याप्यवृत्तिजातितया विषयताविशेषतया वोभयसाधारण्यं

एतल्लक्षणस्यतदीयत्वात्।अप्रामाण्यग्रहस्यचनोत्तेजकत्वंकिंतुतदभावस्यपृथगेवहेतुत्वं।तन्मदवगाहिपरामर्शीयाप्रामाण्यग्रहाभावस्यत
त्तदवगाह्यनुमितित्वावच्छिन्ननियामकसामग्र्यामंतर्भावेनानुपपत्तिः वस्तुतस्तुउभयसाधारणनिष्कंपत्वमुभयाप्रामाण्यग्रहस्यैकरूपेणो
त्तेजकत्वंचान्यत्रव्यवस्थापितमितिनतृतीयोपिदोषइत्यादिस्वयमूह्यं।प्राचीनानुयायिनस्तुमूलेप्रथमत्वान्तेनपरामर्शत्वजात्यवच्छिन्नमु
पलक्ष्यतेतदवच्छिन्नजन्यज्ञानत्वमेवलक्षणंस्वतंत्रमानाभावइत्युक्तमेवेतिवाच्यंकारणतावच्छेदकावच्छिन्नाभावस्यकार्याभावप्रयोजक
तयापरामर्शसामान्याभावकालीनानुमितिसामान्याभावेपरामर्शविशेषाभावकूटस्यप्रयोजकत्वापेक्षयापरामर्शत्वावच्छिन्नाभाव
स्यकार्याभावप्रयोजकत्वेलाघवमित्यस्यैवमानसत्वात्।अतएवसाजात्यतिर्त्वेनसंयोगादौवाकल्प्यतइतिविनिगमनाविरहोपिनिरस्तः।ध
र्मिग्राहकमानेनविशिष्यपरामर्शगतत्वेनैवतत्सिद्धेः एवंसतिविनिगमनाविरहेणानंतव्यक्तिविशेषणतरघटितदीधितिकारीयलक्ष
णापेक्षयालाघवमप्यत्रोपपद्यते।नचप्रमाचतुष्टयस्यैकरूपेणलक्षणालाभःतादृशाकुलधर्मेमानाभावादितिप्राहुः।अपरेतुअनुमि
तित्वमेवलक्षणमाहुर्लाघवात्।नचैवंलक्षणलक्ष्यव्यवच्छेदकयोरैक्येनेतरभेदानुमानेसिद्धसाधनमितिवाच्यं।व्यतिरेकव्याप्त्यासर्गमक
त्वेनादोषात्।पक्षेनुमितिपदवाच्यत्वस्यानुमितित्वेनव्यवहार्यत्वस्यवालक्ष्यतावच्छेदकत्वात्एतेनतयोरैक्येपिनरुक्तेनलक्षणवा
क्यजन्यज्ञानबोधानुपपत्तिरितिनिरस्तं।अनुमितित्वंस्वरूपतोलक्ष्यतावच्छेदकमनुमितितरासमवेतत्वरूपानुमितित्वत्वेनल

क्षणं तथाप्युक्तलक्षणेभ्यो लाघवान्नपायादिति प्राहुरिति कृतं पल्लवितेन॥ ॥गिरिजालिंगसंबद्धाशिवमूर्त्योस्सुसंगतानिश्रेयसार्थि
नोपास्यास्सेव्यालोकेऽस्मानुमाऽऽनसंततभावनालब्धैरर्थैर्युक्तामनोहरा रचितानुमितिग्रंथे व्याख्यासांबपदेऽर्पिताऽस्मिन्महादेवपं
डितविरचिते भवानंदीप्रकाशप्रदेशेऽनुमितिलक्षणप्रकाशः तत्कारणमित्यत्र तच्छब्देनानुमितित्वेनानुमितेः परामर्शे लक्षणलक्ष्यताव
च्छेदकयोरभेदापत्तिः। नचानुमानपदवाच्यत्वं लक्ष्यतावच्छेदकं तस्यानुमाननामकपुरुषसाधारण्यात् लक्षणापत्तेश्चातो व्याप्ति
विशिष्टपक्षधर्मताज्ञानजन्यज्ञानत्वेनपरामर्षइत्याशयेनाशंकते दीधितौ नचेत्यादि। अत्रवदंति तच्छब्देनानुमितित्वेनैवानुमितेः परामर्ष
नचोक्तो दोषः तस्या दोषत्वात्। नचैवमितरभेदानुमानेपक्षतावच्छेदकहेत्वोरैक्येन हेतौ साध्याद्यधिकरणवृत्तित्वरूपव्याप्तिज्ञानेजा
यमानएव तुल्यवित्तिवेद्यतया साध्येपि हेत्वधिकरणवृत्तित्वग्रहसंभवेन पक्षतावच्छेदकाश्रये साध्यसिद्धेः सिद्धसाधनापत्तिरिति
वाच्यं। तुल्यवित्तिवेद्यत्वेमानाभावात्। हेतौ साध्याधिकरणवृत्तित्वे ज्ञातेपि पक्षतावच्छेदकावच्छेदेन साध्यसिद्ध्यभावेन सिद्धसाधनानव
काशाच्च। व्यतिरेकव्याप्तिज्ञानस्याप्यनुमितिकरणतया साध्यसामानाधिकरण्यस्य तत्राघटकत्वाच्च। नन्वेवं तत्कारणपदेनानुमि
तिकरणलाभेऽनुमानपदेनापि अनुपूर्वमाधातोरनुमितित्वविशिष्टस्य करणल्युटश्च करणत्वविशिष्टस्य प्रत्यायकत्वादनुमितिकर हेरंब·
णत्वविशिष्टावगाह्यन्वयबोधो वाच्यः लाभेऽनुमितिकरणमनुमितिकरणमित्यनुमितिकरणत्वविशिष्टेऽभेदसंसर्गेणानुमितिकरण

लविशिष्टावगाहान्वयबोधो वाच्यः सचोद्देश्यतावच्छेदकविधेयतावच्छेदकयोर्भेदाद्घटो घट इत्यत्रैतयोर्नरुक्त्यैनानुपपन्नः अथ घटो घ
ट इत्यादौ शाब्दबोधसामान्यसामग्रीसत्त्वात्कथं न शाब्दबोधः यत्तु नुद्देश्यतावच्छेदकविधेयतावच्छेदकभेदस्य कारणत्वात्तत्र तथा शाब्दबोधः
न च जातिमान् घटो घटो जातिमानित्यादौ व्यभिचार इति वाच्यं निरवच्छिन्नविशेष्यतावच्छेदकतासंबंधेन निरवच्छिन्नघटत्वाद्यवच्छेदकता
निरूपकविधेयताकशाब्दबोधे घटत्वादिभेदस्य कारणत्वात् नन्वेवं जातिमान् जातिमानित्यादावपि शाब्दबोधापत्तिः। विशेष्यतावच्छे
दकतावच्छेदकतासंबंधेन जातित्वाद्यवच्छिन्नविधेयतावच्छेदकताकशाब्दबोधे जातित्वादिभेदस्यापि कारणत्वादिति। तन्न घटो नीलघ
ट इत्यादिशाब्दबोधे नीलघटत्वाद्यवच्छिन्नविधेयतावच्छेदकशाब्दबोधस्थलीयकार्यकारणभावस्य व्यभिचारात् विशिष्टस्यानतिरि
क्ततया घटत्वादेर्नीलघटत्वादिभेदस्याभावात् न च तद्विषयकप्रतीतिविषयत्वरूपपारिभाषिकतद्भेदस्य हेतुत्वान्न दोष इति
वाच्यं। समूहालंबनोपस्थितिजन्यघटो नीलघट इत्यादिशाब्दबोधे व्यभिचारात्। पत्रविधेयतावच्छेदकमविषयीकृत्य नोद्देश्यताव
च्छेदकप्रतीतिस्तत्रैव व्यभिचाराच्च। प्रकारान्तरानुसरणे च गौरवात्। यद्यपि विशेष्यतावच्छेदकतासंबंधेन घटत्वाद्यवच्छिन्नविधेयताकशाब्द
बोधं प्रति घटत्वाद्यवच्छिन्नविधेयतावच्छेदकत्वपर्याप्त्यधिकरणत्वाभावः कारणं घटत्वे नीलघटत्वाद्यवच्छिन्नविधेयतावच्छेदकत्वपर्या
प्त्यधिकरणत्वाभावसत्त्वान्नीलघटो घट इत्यादेरपि शाब्दबोधः स्यादिति वाच्यं। पर्याप्तापर्याप्तसाधारणविशेष्यतावच्छेदकत्वस्यैव प्रत्या

त्तितया नीलघटत्वाद्युभयपर्याप्तविशेष्यतावच्छेदकत्वस्यापर्याप्त्यतिरिक्तसंबंधेन घटत्वादावपि सत्त्वेन तत्र च घटत्वाद्यवच्छिन्नविधेयता
वच्छेदकत्वपर्याप्त्यधिकरणत्वाभावासत्त्वेनादोषात्। न च पर्याप्त्यतिरिक्तसंबंधेन घटत्वादेरवच्छेदकत्वे मानाभावः। विशेष्याद्यवृत्तेर्वि
शिष्टापर्याप्तत्वनियमादिति तदपि [illegible]। नीलघटत्वविधेयतावच्छेदकं न नीलत्वं घटत्वं चेति प्रतीत्या नीलत्वे घटत्वे च प्रत्येकं नीलघटत्व
त्वाद्यवच्छिन्नविधेयतावच्छेदकत्वपर्याप्त्यधिकरणत्वाभावसत्त्वेन विशिष्टस्यानतिरिक्ततया विशिष्टेपि सत्त्वेन नीलो घटो नीलघट-
इत्यादेरपि शाब्दबोधप्रसंगात्। न चैवं नीलघटत्वं न विधेयतावच्छेदकमित्यपि प्रतीत्या तत्त्वस्य तदभावानवच्छेदकत्वात् उभयत्वाधिक
रणेपि एको नोभयमिति प्रतीत्या एकत्वावच्छेदेनोभयभेदस्वीकारेपि द्वित्वोभयत्वस्योभयभेदावच्छेदकत्वास्वीकारवत् तदविरोधात्। न चो
क्तप्रतीतेर्विशिष्टवृत्तिधर्मे विधेयतावच्छेदकत्वपर्याप्त्यधिकरणतावच्छेदकत्वप्रत्येकवृत्तिधर्मे च तदभावो विषय इति वाच्यं। एवं
सति नीलत्वे घटत्वे च विशिष्टधर्मावच्छिन्नविधेयतावच्छेदकत्वपर्याप्त्यधिकरणत्वाभावस्वीकारेण नीलो नीलघटः पटो नीलघट इत्या
देरपि शाब्दबोधस्याभावप्रसंगादिति चेन्न। विधेयतावच्छेदकतासंबंधेन घटत्वाद्यवच्छिन्नोद्देश्यताकशाब्दबोधे घटत्वाद्यवच्छिन्नोद्देश्यता
कशाब्दबोधजनकपदसमभिव्याहृततत्पदज्ञानजन्यायां घटत्वाद्यवच्छिन्नविषयतासंबंधेन विषयताकोपस्थितेः प्रकारतया कारण हेरंब·
त्वात्। जन्यत्वांतविशेषणेन घटो घट इति वाक्यात् तत्पदजन्यजातिमत्त्वप्रकारकघटोपस्थितिसत्त्वेऽपि समभिव्याहृततत्पदांतरजन्यतदुपस्थि-

तिसत्त्वेवानशाब्दबोधःविधेयतयोक्तशाब्दबोधेविषयतयोक्तोपस्थितिहेतुत्वेघटोद्रव्यंघटोघटइतिवाक्यात्। घटोनद्रव्यमितिवाधक
लिघटोघटइतिशाब्दबोधापत्तिःघटपदसमभिव्याहृतद्रव्यपदजन्यद्रव्यत्वप्रकारकोपस्थितिसत्त्वादितितत्परित्यागःनचघटोनीलघ
टइत्यादिवाक्यजन्यबोधेव्यभिचारःतत्रनीलपदजन्योपस्थितेर्नीलत्वेघटपदजन्योपस्थितेर्घटत्वेसत्त्वेननीलघटत्वेकस्याअ-
प्युपस्थितेरभावादितिवाच्यंपदप्रकारयोर्ज्योपस्थितेःकारणत्वेननीलोघटइत्याद्यवान्तरवाक्यार्थबोधोत्तरमेवघटत्वविशिष्टे
नीलत्वविशिष्टघटत्वावच्छिन्नविधेयताकबोधांगीकारेणादोषात्। घटोनीलघटइत्यादिवाक्येविधेयबोधकघटादिपदेनीलत्वविशि
ष्टघटत्वादिनालक्षणायांनीलादिपदस्यतात्पर्यग्राहकतायाअभ्युपगमात्। एवंनामार्थयोर्भेदान्वयस्याव्युत्पन्नतयातत्क
रणमित्यस्यानुमितिसंबंध्यभिन्नमनुमितिकरणमित्यर्थःतन्त्रत्वस्यानुमितित्वविशिष्टसंबंधिपरत्वात्करणपदस्यकार्यघटितकर
णत्वविशिष्टार्थकत्वेनानुमितिकरणपरत्वात्। अभिन्नत्वस्यचसंसर्गत्वात्। अनुमानमित्यस्यतुअनुमितिकरणमित्येवार्थःधातोरनुमि
तिपरत्वात्ल्युटःकार्याघटितकरणत्वविशिष्टार्थकत्वात्। ल्युटःप्रत्ययतयातदर्थकरणत्वघटकाधिकरणेधात्वर्थस्यभेदेनान्वयात्
विशिष्टार्थलाभःनचल्युटोपिकार्यकैघटितकरणत्वविशिष्टार्थकत्वंकेवलकरणपदात्तात्पर्यज्ञानसत्वेविनापिकार्यवाचकपदादिपदाध्याहा
रंघटादिकरणबोधोदयेनतस्यतथात्वेपिल्युटःकेवलस्याप्रयोगात्तथात्वेमानाभावात्। तथाचमिलित्वानुमितिकरणमनुमितिसंबंध्यभि

णमनुमितिकरणमित्युद्देश्यविधेयभावेनान्वयबोधाद्विधेयतावच्छेदकतापर्य्याप्त्यधिकरणधर्मवत्त्वस्योद्देश्यवाचकपदादलाभेनघटोनी
लोघटइत्यादाविवनयोनरुक्त्यमिति अत्रेदंबोध्यंचरमनिर्दिष्टस्यैवविधेयतयानुमानमित्यस्यात्रविधेयतयातदर्थस्योद्देश्यतत्करणमित्य
तोलाभेननीलघटोघटइत्यादाविवनयोनरुक्त्यमस्त्येव। किंचकरणपदस्यतत्तत्कार्यघटितकरणत्वविशिष्टार्थकत्वेनानार्थत्वापत्तिरितिका
र्यघटितकरणत्वविशिष्टमर्थः तत्राधिकरणेसमभिव्याहृतपदार्थस्यव्युत्पत्तिवैचित्र्यादिनान्वयः केवलकरणपदात्तात्पर्यधीसत्वेलक्ष
णयैवतत्तत्कार्यकरणबोधः एवंचात्रानुमितिकरणमनुमितिकरणमितिबोधस्यैवोत्पत्तुमर्हतयायोनरुक्त्यंऽदुरुद्धरमेवेतिनतत्पदस्यना
नुमितित्वविशिष्टपरत्वंकिंतुउक्तलक्षणविशिष्टपरत्वमितिदीधितिकारस्याशयइतिसूक्ष्मदृश्याविभावनीयंसुधीभिरितिविशिष्टपदस्य
प्रकारपरतयाज्ञानान्वयितयाव्याप्तिप्रवेशादाहव्याख्यायांव्याप्तिज्ञानत्वमित्यादितथापिनिश्चयत्वघटकज्ञानान्वयितयापक्षधर्मता
याएवनिवेशेनव्याप्तिप्रकारकज्ञानत्वस्यगमकत्वासंभवइत्यतआह। पक्षधर्मतांशेइति। निवेशइतिनिश्चयत्वस्यसंशयेतरज्ञानत्वरू
पत्वादितिभावः ननुपक्षधर्मतांसंशेव्याप्तिप्रकारकनिश्चयत्वंविवक्षितंविवेकेनव्याप्तिप्रकारतानिरूपितहेतुप्रकारतानिरूपितपक्षधैवि
शेष्यताकनिश्चयत्वंतत्रचनव्याप्तिप्रकारकज्ञानत्वस्यनिवेशइत्यतआह व्याप्तिज्ञानत्वमिति व्याप्तिप्रकारकेतिउक्तार्थकं। यत्तुननुव्याप्तिज्ञा हेरंब·
नत्वंनहेतुः अपितुनिश्चयत्वंतच्चनलक्षणवाक्यादुपस्थितंसंशयेव्याप्तत्वविशिष्टवैशिष्ट्यविषयतायाएवजनकतावच्छेदकत्वेनव्याप्यत्वंशे

निश्चयत्वानिवेशादत आह व्याप्तिज्ञानत्वमिति तच्चिंत्यं संशयात्मकव्याप्तिज्ञानस्याप्यनुमितिस्वरूपयोग्यतयानुमानत्वेन व्याप्तिज्ञान
त्वस्यैव हेतुत्वात् एव व्याप्तिप्रकारकज्ञानत्वस्यापि निवेशादित्युक्तं व्याप्त्यंशे संशयव्यावृत्तविशिष्टवैशिष्ट्यविषयताया जनकतावच्छेदक
त्वेपि व्याप्त्यंशे निश्चयत्वनिवेशस्यावश्यकत्वस्य पूर्वमुपदर्शितत्वाच्च। संशयसाधारणविषयताया एव जनकतावच्छेदकत्वस्य व्याख्यात्रा
पूर्वमुक्तत्वेन संदर्भविरोधाच्च। अथात्र व्याप्तिप्रकारकपक्षधर्मतानिश्चयत्वस्य परामर्षवृत्तितया व्याप्तिज्ञानरूपानुमानावृत्तितया हेतु
त्वासंभवेन तत्करणत्वस्यैव हेतुत्वमुचितमिति चेन्नापरामर्षस्यानुमानमित्याशयात्। वस्तुतस्तु व्याप्तिज्ञानस्यैवानुमानत्वेपि न क्षतिः भागा
सिद्धिमात्रवारकतया तत्करणत्वस्य हेतुत्वे वैयर्थ्यस्य दुर्वारत्वात् अग्निमाभागासिद्धिरित्यादिदीधितिग्रंथस्यापि व्याप्तिप्रकारकपक्षधर्मता
निश्चयत्वस्यानुमानावृत्तित्वेपि अधिकस्य भागासिद्धिवारणमात्रप्रयोजनकत्वादित्यस्योपलक्षकत्वं तुल्यन्यायात्। व्याप्तिप्रकारकः
ज्ञानत्वादेः तत्वाद्यवच्छिन्नस्यः व्याप्तिकप्रकारकज्ञानेति तादृशज्ञानकेत्वावच्छिन्नेत्यर्थः। घटितत्वादिति ज्ञानत्वस्य ज्ञानवृत्तित्वादिघटितत्वा
दितिभावः तस्यैवेति व्याप्तिज्ञानत्वावच्छिन्नस्यैवेत्यर्थः उचितमिति। अयमाशयः व्याप्तिज्ञानत्वस्य गमकत्वे तत्त्वमेव गमकतावच्छेदकं वाच्यं न
चतन्नलक्षणप्रविष्टमिति वाच्यं। तादृशनिश्चयत्वावच्छिन्नहेतुतायाः प्रवेशे व्याप्तिज्ञानत्वस्यापि प्रवेशात्। एवं च तद्घटकव्याप्तिज्ञानत्वाव
च्छिन्नस्यैव गमकत्वमुचितं उपाध्याद्यवच्छिन्नापेक्षया तात्त्वावच्छिन्नस्य लघुत्वादिति न तत्सार्थकत्वमिति न च व्याप्तेरिव पक्षधर्मताया अ

पि अनुमित्यनुगुणत्वात् असिद्धिवारकस्यापि सार्थकमस्तीति वाच्यं। व्यर्थविशेषणतया तद्धर्मावच्छिन्ने व्याप्तेरग्रहेण पक्षधर्मताया अकिंचित्क
रत्वात्। यन्निष्ठेति न्यायात्। यन्निष्ठेत्यादिन्यायात् यन्निष्ठा यन्निरूपिता व्याप्तिर्यो न विशेषणेन विना गृहीतुं न शक्यते तन्त्र सार्थकमिति न्या
याद् इति यावत्। धर्मिभेदादित्यादि। न च धर्मिभेदेऽप्येवं वैयर्थ्यं तदभेदे तु वैयर्थ्यमित्यत्र किंबीजमिति वाच्यं। व्याप्तेरवच्छिन्नत्वनियमेन धर्मिभेदे धू
मप्रागभावादित्यादौ धूमत्वस्य व्यधिकरणतयाऽवच्छेदकत्वासंभवेन लघ्ववच्छेदकान्तराभानाच्चागत्या धूमप्रागभावत्वादेरवच्छेदकत्वा
त्। धर्म्यभेदे तु नीलधूमादित्यादौ धूमत्वादेर्लघोरवच्छेदकत्वसंभवेन नीलधूमत्वादेर्गुरोरनवच्छेदकत्वात्। व्याप्तिज्ञानत्वमेवेति। करण
त्वावच्छेदकधर्मस्य करणत्वरूपत्वादिति भावः। प्रकृतेति। तादृशज्ञानिके मे रणत्वेत्यर्थः सार्थकत्वमिति। यत्तु फलतो भागासिद्धिवारणेऽप
र्यवसानाद्वैयर्थ्यमिति तत्र। व्याप्तिग्रहोपपादकत्वेन सार्थक्यात्। असिद्धिमात्रवारकस्यैव व्यर्थत्वात्। अत एव दीधितौ भागासिद्धिवारणमात्रे
णोक्तं वदंतीति। व्याप्तिज्ञानत्वस्वरूपत्वे व्याप्तिज्ञानस्वरूपत्वेऽपि धर्मिभेदाभाव एवास्वरसः। तादृशज्ञानत्वमिति तथा च तादृशज्ञानत्वानवच्छे
द्यत्वादित्यस्य परामर्शत्वाद्यनवच्छिन्नत्वादित्यर्थ इति भावः। अन्ये त्वेतेति तादृशज्ञानत्वस्य व्याप्तिज्ञानत्वरूपत्वेऽप्युक्तरीत्योपपत्तिः तादृश
ज्ञानत्वं परामर्शत्वमित्यस्य परामर्शकारणतापक्ष एव सुवचत्वात् तत्पक्षे परामर्शत्वस्य कारणतानात्मकत्वासंभवश्चास्वरसः। एतेन व्या हेतुंव-
प्तिज्ञानस्य तादात्म्यसंबंधेन हेतुतापक्षेदं बोध्यं तस्य करणत्वानात्मकत्वपा धर्मिभेदादित्यपि निरस्तं उक्तरीत्या व्याप्तिज्ञानत्वस्य हे

तुल्येप्युपपत्तेः तादात्म्येन व्याप्तिज्ञानस्य हेतुतापक्षे व्याप्तेर्व्याप्तिज्ञानत्वावच्छेद्यताया एव पूर्वपक्षिणोक्तत्वात्तादृशज्ञानत्वावच्
छेद्यत्वादिरूपस्यानुक्तोपालंभत्वापत्तेश्च। वैयर्थ्यमतेनेति। अत्र मतेनेत्युक्त्या उक्तास्वरससूचनेन पूर्वोक्तकरणत्वनिष्ठे त्यादावेव विमर्शः
स्थितःहेतौ। व्यापकतावच्छेदककोटिप्रविष्टहेतौ। वैयर्थ्यशंकेति। तथा च लक्षणस्य केवलव्यतिरेकिहेतुतया व्यतिरेकव्याप्तेरेव
प्रकृते गमकतोपपत्तिकत्वेन साध्याभावत्वावच्छेदेन हेत्वभावव्याप्तेर्ग्राह्यतया हेतुतावच्छेदकस्य व्याप्यतानवच्छेदकत्वेपि न क्षतिरिति भा
वः इति भवानंदी प्रकाशेनुमानलक्षणप्रकाशः। लिंगस्य नित्यत्वेपि फलतः प्रत्यक्षोपजीवकत्वस्यानुमाने संभवादाह दीधितौ स्वरूप
तद्गति फलद्वारोपजीवकत्वं पक्षस्यैवोपर्व्वौरिकतया रूपएवेति भावः। यद्वा लिंगस्य नित्यत्वेपि अनुमितिकारणत्वसामानाधिकरण्येनोपजी
वकत्वं संभवादाहानुमितिकरणस्य स्वरूपतद्गतिपक्षयोः भेदः स्वान्वयी स्वस्य रूपमनुमितिकरणत्वं तदवच्छेदेनेत्यर्थः। न च व्याप्तिज्ञान
रूपलिंगपरामर्शरूपस्येश्वरज्ञानस्य नित्यतया न प्रत्यक्षोपजीवकत्वमिति वाच्यं। जन्यव्याप्तिज्ञानत्वेनैवानुमितिकरणत्वमित्याशयात्।
अत्र केचित् दृष्टांचोपजीवकतायास्तत्स्यत्वेपि न क्षतिरिति मुख्यकल्पे लिंगस्यानुमानत्वेपि लिंगत्वसामानाधिकरण्येन प्रत्यक्षोपजीवकत्वस्य
संगतित्वसंभवात् नेष्टं तच्चेति मूलमवतार्य किंतु प्रकारांतरेण तथा हि। सर्वस्य लक्षणस्वरूपप्रामाण्यादिभिर्निरूपणीयत्वेन लक्षणानंत
रं क्रमप्राप्तं स्वरूपमाह तच्चेति। यद्यपि स्वरूपानंतरं लक्षणनिर्देशो युक्तस्तथापि लक्षणवाक्येनैव लक्ष्यस्यापि प्रतिपादने पुनः स्वरूप

निर्देशो विप्रतिपत्तिनिरासायेत्याहुः अपरेत्तु उक्तलक्षणं पारिमाण्डल्ये ऽव्याप्तं तस्य कार्याकारणत्वेन तद्विशेषकरणत्वासंभवादतआ
हुः तज्ज्ञेतित्तु। था च तस्याकारणत्वेपि तज्ज्ञानस्य कारणत्वान्न कोपि दोष इत्याहुः। श्रवणकरणकात्मतत्वसाक्षात्कारे विशेषणज्ञा
नकरणकविशिष्टवैशिष्ट्यप्रत्यक्षे चाव्याप्तेराहुः व्याख्यायां। ज्ञानत्वावच्छिन्नेति अवच्छेदकत्वमिह तत्कं सर्वात्स्याधिकरणत्वं उक्तस्य।
त्वीप्रत्यक्षकरणतापाश्चात् तथात्वान्न दोषः अनुमित्यादौ च सामान्यतो ज्ञानत्वेन करणत्वान्नातिव्याप्तिः तत्रापि व्याप्तिज्ञानत्वादिनैव क
रणत्वं न त्विति प्रसक्तं ज्ञानत्वेनेत्यत आह ज्ञानकरणकत्वेति। नापवादिकेति तथाच प्रत्यक्षलक्षणेन नानुमितिव्यावृत्तमन्यदेव कार्यमुक्तल
क्षणस्य वाभातोऽव्यासुषादिवृत्तित्वनिवेशमतो नातिव्याप्तिरिति भावः इति भवानंदीप्रकाशेनुमानस्वरूपनिरूपणप्रकाशः असिद्धीति
आश्रयासिद्धीत्यर्थः। मुख्येति पूर्वकसेनुमानपदं लाक्षणिकं ततो धूमज्ञानत्वादिना धूमादिज्ञानस्य लक्षणयैव बोधतएवं शक्तिं
विनाशक्यसंबंधरूपलक्षणापाअप्यसंभवेनानुमानपदस्य शक्यार्थपरत्वस्यावश्यकत्वे तत्परत्वमेवोचितमिति भावः असदिनी
तिख्यातिः ज्ञानः उपनीतं। विषयीभूतं अनुमानमेव। अनुमितिकरणत्वावच्छिन्नमेव अनुमानमित्यनुषज्यते अनुमानपदार्थ इति।
तदर्थः चार्वाकमते ऽनुमित्यसत्वेपि असत्ख्यातिसत्वेनानुमानपदार्थोनुमितिकरणत्वावच्छिन्ने ऽलौकिकएकप्रामाण्यसाधनेनाश्र। हेतुंच
याज्ञानरूपासिद्धिरिति भावः ननु पारमार्थिकस्यैव पदार्थत्वेनालीकानुमितिकारणत्वावच्छिन्नस्य कथमनुमानपदार्थत्वमत आ

हा। तन्मत इति अलीकत्वं न तु परामर्शेर्थिके तदेवाह: अनुगतेति। व्यक्तेरननुगतत्वेन पदप्रवृत्तिनिमित्तीभूतानुगताकारणेत्याद्यवच्छिन्नस्य गवादि
पदानां शक्तिर्वाच्या गौरवादेश्चातद्व्यावृत्त्यात्मकत्वेनाभावरूपतया अलीकत्वेन सदसत्त्वं धर्माभावाद्विशिष्टस्याप्यलीकत्वेन तत्रैव शक्तिरित्याशयः
कृत्वेन प्रमाणमिति प्रमाणभिन्नमित्यर्थः तन्मतेऽलीकाधिकरणकात्यन्ताभावस्यानभ्युपगमेपि अलीकाधिकरणकभेदस्याभ्युपगमादि
ति भावः। हेतुश्चाप्रमाणताप्रयोजकरूपशून्यत्वं स्वरूपासिद्धिं निराकरोतीति योग्योपाधीनामिति नन्वेवं धूमादिदर्शनानन्तरं लोकानां पर्व
तो वह्निमानिति वाक्यप्रयोगात्मकव्यवहारो न स्यात् तज्जनकवाक्यार्थनिश्चयाभावादत आह लोक इति लोकानामित्यर्थः संभावनामा
त्रादिति मात्रपदेन निश्चयव्यवच्छेदः नन्वेवं वाक्यप्रयोगे वाक्यार्थसंभावनात्वेन हेतुत्वेऽप्रामाण्यनिश्चयत्वावच्छिन्नाभावस्य तत्र निवेशनीयत
या गौरवमिति वाच्यं तन्मते कर्त्तृरूपत्वेनैव हेतुत्वात् ननु तर्हि तत्र कथं प्रामाण्यं गृह्यत इत्यत आह संभावनेति व्याख्यायां प्रमाणान्तरेति प्रमां
तरेत्यर्थः तथा चासंभव इति भावः ननु द्वयोरेकविषयत्वात्र दोष इत्यत आह जगत इति। ननु जगतः क्षणभंगित्वमसिद्धं प्रत्यभिज्ञादिविरोधेन स्थिरत्वा
त् किंचैकक्षणोत्पन्नाध्यक्षद्वयमादाय उक्तसंवादोपि संभवतीत्यत आह किंचेति। असंस्पृष्टेति अविषयीकरणात्। अन्यथा सद्विषयत्वेन प्रमा
त्वापत्तेरिति भावः इत्यत इति इदमुपलक्षणं संवादस्य संवादाभिमानपरत्वे लक्षणापत्तिरित्यपि द्रष्टव्यं। शशविषाणेति तन्मते विकल्पो द्विवि
धः अध्यक्षमूलकः अनादिवासनापरिपाकमात्रमूलकश्च तत्राद्यो वह्न्यादिविकल्पः अंत्यश्च शशविषाणादिविकल्प इत्याशयः वारणार्थ

।संवादघटकत्ववारणार्थं तद्विषयविषयकस्य संवादत्ववारणार्थमिति यावत्। पंचम्यनुपपत्तिः हेतुत्वार्थकपंचम्यनुपपत्तिः पंचम्यर्थहेतु
त्वान्वयानुपपत्तिरिति यावत्। सा च संभावनायां विषयनिष्ठस्य निरुक्तोल्लिखितत्वस्याभावादवसेया। अत्राध्यक्षमूलकविकल्पेति प्रकृ
ताभिप्रायेण वस्तुतोऽध्यक्षमूलकत्वमात्रमध्यक्षांतरसाधारणमिति विवक्षितं तेनैतादृशसंवादस्य सद्विषयकत्वरूपप्रामाण्यसहचारस्त
न्मते नास्तीति ज्ञानकार्या अस्मिन्कल्पे च तादृशसंवादात्मकदोषेण संभावनात्मकज्ञाने प्रामाण्याभिमानादिति संवादेनेत्यादिमणिफ
क्किकार्थं नन्वनुमानत्वावच्छेदेनाप्रामाण्योपक्रमात्प्रत्यक्षान्यत्वावच्छेदेनोपसंहाराच्चोपक्रमोपसंहारविरोधस्य तत आह दीधितौ अनुमा
नाप्रामाण्यप्रतिज्ञामूलकेति अनुमानप्रामाण्यमूलकेत्यर्थः समर्थयेति शक्तीत्यर्थः शक्तिनिर्णयादीनां यथा तन्मूलकत्वं तथा प्रागेवोक्तं दू
तीति तथा चेतीति मूलस्याप्रामाण्यानुमानकत्वादित्यर्थः एतद्धेतुसंवादनायैवानुमानाप्रामाण्यसाधनमिति भावः व्याख्यायां तथा चेत्या
दिअयमाणानुमानकत्वादित्यर्थः एतद्धेतुसंवादनायैवानुमानाप्रामाण्यसाधनमिति भावः व्याख्यायां तथा चेत्यादिअयमाण्यः नात्र
प्रत्यक्षं प्रमाणमिति नोपसंहारः किंत्वयमेव मुख्य उपक्रमः एतदनुकूलाप्रामाण्यसाधनायैवानुमानं न प्रमाणमिति पूर्वोक्तः गौणउप
क्रमः प्रमाणताप्रयोजकरूपशून्यत्वमुभयत्रैव हेतुः प्रयोग इत्येतात्पर्ये उपसंहारस्तूभयोरप्युपक्रमपर्यवबोध्य इति नोपक्रमोपसंहारविरोधः हेत्वं·
।न्यत्वेन प्रत्यक्षं प्रमाणमित्युपसंहारानुरोधेन अनुमानं न प्रमाणमित्युपक्रमस्यैव त्रितयाप्रामाण्यतात्पर्ये अनुपपत्त्यानुमानमित्यनमा

न परव्यस्यत्तेरिति न तद्विरोधः। इत्येक एव प्रयोग इति दीधित्याद्युपवर्णनं तन्न एवमपि प्रत्यक्षोत्तरत्वप्रत्यक्षभिन्नत्वरूपधर्मितावच्छेदकभेदेन
धर्मितावच्छेदकैक्यानियततया क्रमोपसंहारविरोधस्य तादवस्थ्यात्। योग्योपाधीनामित्यादिग्रंथेनानुमानाप्रामाण्यमात्रहेतुकथना
स्वारस्याच्च उपक्रमस्यासंजातविरोधितया बलवत्त्वेनोपसंहारानुरोधानान्यथा नयनानौचित्याच्च। प्रयोगांतरएवेनाप्रत्यक्षं प्रमाणमि
त्याद्युक्तिर्दीधितिस्वारस्याच्च। न च प्रयोगद्वयांगीकारे नाप्रत्यक्षमित्यस्यानुमानसाधारण्येनानौचित्यमिति वाच्यं· तस्य प्रथमं प्रवृत्त
त्वात्तच्छब्दोद्यमानमात्रसाधारणैकपक्षतावच्छेदकाभावेन प्रयोगाधिक्यापत्तेश्च। यदप्यत्रोपक्रमानुरोधेनोपसंहारस्याप्रत्यक्षप
दमनुमानपरं अतएव पूर्वमीमांसायां तृतीयाध्याये वाक्यपादे उच्चैस्त्वाधिकरणे उच्चैरृचाक्रियत उपांशु यजुषा उच्चैः साम्नाइत्य
त्रऋगादिपदं मंत्रब्राह्मणमपि लक्षणया वेदपरं त्रयो वेदा असृज्यंत अग्नेरृग्वेदो वायोर्यजुर्वेद आदित्यात्सामवेद इत्युपक्रमस्थवेदप
दानुरोधादित्युक्तमिति तदपि न तथा सति इतीति हेतुनिर्देशानुपपत्तेः उपसंहारैकदेशानिर्देश एवायं इतिशब्दस्य तस्मादित्येतदर्थकत्वा
दिति चेत्तथा सत्यपि नानुमानमित्येव स्यात् न हि पर्वतो वह्निमानिति प्रतिज्ञाय तस्माद्वह्निमानिति कश्चन प्रयुंक्ते। एतेन शब्दादिप्रा
माण्यान्यथानुपपत्त्यानुमानप्रामाण्यस्यैवमित्याशंकां निराकरोति नाप्रत्यक्षमपीतीति व्याख्यानमपि परास्तं तथा सति अप्रत्यक्षस्या
प्रमाणत्वादिति कथनौचित्यादिति अप्रमाणसाधर्म्यस्य। तद्वृत्तिधर्मस्य इंद्रियत्वं। इंद्रियत्वमेव। व्याप्तिनिश्चयत्वादि चेति आदिनाशब्दो

यमानयोः प्रमाणताप्रयोजकस्य पदज्ञानत्वादेः परिग्रहः चकारेणेन्द्रियत्वपरिग्रहः एकतरेति आद्यं चार्वाकसिद्धं द्वितीयं सिद्धं
ति सिद्धं व्याप्तिनिश्चयाभावप्रदर्शनेति तेन च व्याप्तिनिश्चयसंभवेपि आनुमितेरनुगतालीकधर्मविषयकत्वेन तन्मते प्रमात्वानुपपत्त्या
अनुमानप्रामाण्यासंभवेन व्याप्तिनिश्चयाभावप्रदर्शनवैयर्थ्यमिति वाच्यं। अनुगतधर्मस्यालीकत्वाभावस्य सिद्धान्तपक्षे नैयायिकाभि
मतानुमानप्रामाण्यासिद्धिरित्याशयेन तत्प्रदर्शनात्। अत एव धूमादिदर्शनानन्तरं विशेषदर्शनाधीनमानसवह्न्यादिनिर्णयेनापि वह्न्या
दिव्यवहारोपपत्तौ लोके धूमादिदर्शनानन्तरं वह्न्यादिव्यवहारश्च संभावनामात्रादित्यनेन संभावनया तदुपपादनं निर्बीजमिति शंकापि
निरस्ता। व्याप्तिनिश्चयाभावेन विशेषदर्शनाभावान्मानसवह्न्यादिनिर्णयासंभवात्। यत्तु विनिगमनाविरहेण संभावनया तदुपपादनमि
ति। तत्र। उभयत्र तुल्यकोटिकसंशयात्मवृत्तिवारणाय तज्जनकतायां निश्चयत्वनिवेशस्यावश्यकतया संभावनायाश्च संग्रहायत्वात्।
कोट्यंशे उत्कटान्यतदभावप्रकारकान्यत्वरूपनिश्चयत्वनिवेशगौरवेण लाघवस्यैव मानसवह्न्यादिनिर्णयेन तदुपपादने विनिगमक
त्वात्। आपादनायैव। संपादनायैव। निश्चितं घटादि दृष्टांतस्वरूपं तत्तु रूपष्यत्वलाक्षणिकत्वेन उद्घुकर्मधारयमाह। दृष्टं ज्ञायमानमिति
दृसनेन। दृष्टं तेन कवित्तथैव पाठः तथा च हेतुरित्यनन्तरोक्तेति पदो यस्याप्यप्रकृतवाक्यार्थः कर्मक्रान्ताभिहितमित्यत्र कर्मत्वेनान्वेती हेत्व·
तिभावः साधर्म्यदर्शनेन यथासंभवं तत्तत्साधर्म्यदर्शनेन संभाव्यतिसंभावना चाग्रहीता संसर्गकार्यस्मृतिः उत्कटकोटिकसंशयो वा अ

द्येउत्कैकदेशपकविषयाऽंसेचोत्कटकोट्युपस्थापकतयात तत्साधर्म्यदर्शनोपयोगः तत्र व्यवहारेति अनुमानापा(मा)ण्यादिव्यवहारइत्यर्थ
: लोके धूमादिदर्शनानंतरमित्यादिर्नतिशेषः तेनवह्न्यादिव्यवहारोपपादनस्यैवोक्तत्वात्कुल्ममिति। संभावनायाऽसाधारणरूपेणैवतत्स
द्व्यवहारहेतुत्वमितिभावः। जल्पस्थलेप्यवयवोत्कटकोटिकसंभावनयैववादिविजयइतिध्येयं। संभानायामितिंसतिसप्तमीसंभावनपेत्य
पिपाठः कथमिति व्यवहर्त्तव्यनिश्चयस्य व्यवहारहेतुत्वादित्याशयः व्यवहर्त्तव्यज्ञानसंशयस्यहेतुत्वे त्वाहकथंचेतितदुपच्छेदायतन्निरासा
यः प्रतियोग्यनिर्णयेनतन्निरासरूपेष्टज्ञानासंभवेनतत्साधनताज्ञानासंभवात्तदुद्देशप्रयोगेप्रवृत्त्यसंभवादितिभावः व्याचक्रुरिति अभिहितमे
वेत्येवकारास्वारस्यमस्वरसः नाप्रामाण्याभावेति असद्विपक्षकत्वरूपभ्रमत्वस्य प्रामाण्यवद्विशेष्यकत्वं विनाप्युपपत्तेरनुमानप्रामाण्य
साधकत्वादितिभावः दीधितौस्वतइतीति अत्रचस्वतः प्रामाण्यग्रहएवतेषां निर्भरइतिसच्च नायानुपपत्तेरित्यंतंप्रतीकमधृत्वास्वतइतिप्र
तीकंधृतमिति ध्येयं व्याख्यायारंजतत्वप्रकारकत्वेत्यादि इदंचनैयायिकमतरीत्यातेनोक्तं अन्यथातन्मतेनिर्विकल्पकस्यैवप्रमात्वेनरजत
त्वप्रकारकत्वस्यतद्वृत्तितयाभ्रममात्रवृत्तित्वेनसाधारणधर्मत्वानुपपत्त्यात तद्दर्शनत्वेनसंशयाहेतुतया कुर्वद्रूपत्वेनैवसंशयहेतुतयाऽसंग
तेः व्यावर्त्तकधर्मविषयाः तद्दर्शनविषया अप्रामाण्याभावव्याप्यतयातदवच्छेदकतयावेत्यपिबोध्यं स्वसंवेदनेती। तेनचस्वतः प्रामाण्य
ग्रहइतिमूलोक्तस्यात्र पुनरभिधानं निष्प्रयोजनकमितिवाच्यं॥ निर्विकल्पकमात्रस्यैवतयात्वंनतुसंविकल्पकस्येतिसूचनायतत्संश

यानुपपन्नाविषयापत्तिस्तवनायचातदभिधानात्। स्वात्मकेनेति। तन्मते हि सद्विषयत्वं प्रामाण्यं सत्ताविषयत्वं च तच्छक्तिरेव तत्र धर्मान्तराभावा
दित्याशयः समुल्लिखितइत्यादि। एतेन साधारणधर्मदर्शनस्य कोटि-रूपविशेषादर्शनस्य सत्त्वेनेदमपि परमताभ्युपगमेन स्वमते कुर्वद्रू
पत्वेनैव संशयहेतुत्वात्। तथा च सविकल्पके प्रामाण्याभावात् स्वतः प्रामाण्यग्रहासंभवेन संशयः संभवति न चानुगताकारविषयत्वस्य
प्रामाण्याभावव्याप्यस्य निश्चयात्र संशयसंभव इति वाच्यं। तस्य तद्व्याप्यत्वनिश्चयदशायां तत्संभवादिति भावः। प्रामाण्यसंशयानु
पपत्तिद्वारेण स्वतः प्रामाण्यग्रहसंभवेनानुमानात्प्रामाण्ये प्रत्यक्षाप्रामाण्यापत्तिरूपबाधकोद्धारस्तदासंभवति यदि तदुपपादकसन्मा
त्रावलंबनत्वादिपर्यवसन्नोक्तानुगताकारसंशयस्य शिल्पादिवुद्धिस्सा चानुमानाधीनैव असद्विषयताभावव्याप्येन सद्विषयत्वेन सन्मा
त्रावलंबनत्वस्य स्वप्रकाशत्वव्याप्येन ज्ञानत्वेन स्वविषयत्वस्य अनवस्थापादकपरग्राह्यत्वशून्यत्वे सति ग्राह्यत्वेन प्रामाण्यावगाहि
त्वस्यानुमानादित्याशयेनाह दीधितौ निर्विकल्पकस्येति। ननु सन्मात्रावलंबनत्वादिकमपि स्वतएव गृह्यतामत आह। व्याख्यायां।
असदिति। ननु सत्वव्याप्यस्वविषयताकत्वं सन्मात्रावलंबनत्वं नासद्वृत्ति तद्वृत्तिकिं न चेदमपि असदभावघटितव्याप्तिघटितत्वेनासद्घटि
तद्वृत्तिकमिति वाच्यं अभावाघटितस्वरूपसंबंधरूपावच्छेदकत्वघटितसाध्यसामानाधिकरण्यावच्छेदकादिरूपव्याप्तेरेवात्र घटकत्वा हेरंब·
दत आह विषयितेति। सन्मात्रविषयकत्वादेः स्वविषयत्वे तुल्यन्यायात्। तद्विषयकत्वेपि तत्वं वाच्यं। एवं तद्विषयकत्वेपीति भावः। अप्रा

माणिकत्वापातात् असत्वापातात्। अत्रहेतुमाहुः। संभावनायाइति अत्रचार्वाकानुपायिनः निर्विकल्पस्यसन्मात्रावलंबनत्वाद्यनु
रोधेनानुमानप्रामाण्यसिद्धिरित्यसंगतमेवतेषांस्वतोग्राह्यत्वात्। नचानवस्था। नैयायिकानामपिपरतःप्रामानप्रामाण्यसिद्धिरित्य
संगतमेवतेषांस्वतोग्राह्यत्वात्। नचानवस्थाग्रहेतानानवस्थायास्सत्वेनतौल्यात् तुल्यसमाधानत्वाच्चेतिवदंतिः अत्रकेचित्। व्यक्तिरि
वानुगतधर्मस्यापिसत्वेनानुभवसिद्धत्वान्नालीकत्व। एवमसतःख्यातिसामग्र्यभावेनासतख्यातावपिमानाभावःस्वप्रकाशतातुतत्र
तत्रनत्तद्युक्तिभिर्निराकृतैवेतिसविकल्पकस्यापि सन्मात्रावलंबनत्वेन प्रामाण्यंसंभवत्येव एवंचस्वतः प्रामाण्यग्रहेतत्संशयानुपपत्ति
सत्वेनानुमानाप्रामाण्येप्रत्यक्षस्याप्यप्रामाण्यापत्तिरूपोमूलोक्तदोषोनिराबाधएवेत्यनुमानप्रामाण्यसिद्धिर्निराबाधेवएतेनतन्मते
ऽसद्विषयकत्वाभावस्यापिधकरणानतिरिक्तात्स्वविषयकत्वादेश्चस्वस्वरूपत्वात्स्वरूपतःस्वग्राह्यतैवतेषां अनुगततत्तद्धर्मेण तुसंभाव
नीयत्वमेवचनचैवंतेषामात्वापत्तिःसदसतोःसंबंधाभावेनालीकानुगतधर्मविशिष्टस्याप्यलीकत्वेनस्वग्राह्यस्वरूपातिरिक्तानांसंभाव
नाविषयाणामसत्वेनिर्विकल्पकविषयस्वरूपातिरिक्तायंघटइत्यादिसविकल्पकत्वकविषयाणामिवेष्टापत्तेरितिनदीधित्युक्तंसन्मा
त्रावलंबनत्वादीनामनुमानाधीनसिद्धिकत्वमित्तिनानुमानप्रामाण्यमासिद्धिरित्यपिपरास्तमित्याहुः अपरेतुअनुमानाप्रामाण्य इत्या
दिमूलग्रंथोपदर्शितरीत्यैवानुमानप्रामाण्यसिद्धिः तद्ग्रंथस्यान्यार्थकत्वेननचेत्यादिदीधितिदुक्तदूषणस्याप्रयोजकत्वात्। तद्ग्रं

थस्यहि ठक्कुरीया अनुमानप्रामाण्याभावे साक्षात्कारस्याप्रमात्वापत्तिः स्वतःप्रमात्वग्रहे तत्संशयानुपपत्तिरितिनार्थः तन्मते फलबले
ककल्प्येन कुर्वद्रूपत्वेन प्रामाण्यनिश्चयस्य स्वसंशयंप्रतिबंधकत्वात् प्रामाण्यसंशयानुपपत्तिरूपबाधकाभावेन स्वतःप्रमात्वग्र
संभवेनासंगतेः किंतु प्रकारांतरेण तथाहि अनुमानाप्रामाण्ये अनुमानप्रामाण्याभावे। प्रत्यक्षस्य। प्रत्यक्षस्य। प्रत्यक्षप्रामाण्याप
त्तिः प्रमाकरणत्वाभावापत्तिः तन्मते सन्मात्रविषयकत्वरूपप्रामाण्यस्यानिर्विकल्पकएवसत्वेन तल्लौकानुगतविषयके सविक
ल्पकरति अनुमानाप्रामाण्ये निर्विकल्पकरूपप्रमायांप्रमाणाभावे नप्रत्यक्षप्रमाकरणत्वलक्षणप्रमाण्यं प्रत्यक्षेनस्यादिति भा
वः ननुप्रत्यक्षेणैव निर्विकल्पकग्रहो भविष्यतीत्यत आह प्रामाण्यस्येति प्रामाण्यस्य प्रमात्वाश्रयस्य निर्विकल्पकस्येति यावत् अ
नुमेयत्वात् अनुमानादिभिरेव ग्राह्यत्वात् नान्विदमेवासिद्धं निर्विकल्पस्य स्वतोग्राह्यत्वादित्यत आह स्वतइति प्रामाण्यग्रहे प्रमात्वा
श्रयस्य निर्विकल्पकस्य ग्रहे तत्संशयानुपपत्तेः तस्य निर्विकल्पकस्य संशयो विवादः तस्यानुपपत्तेः निर्विकल्पके कस्यापि विवादो न स्यादि
न स्यादिति भावः केचित्त्वाहुः वस्तुतस्तु अनुमानाप्रामाण्ये प्रत्यक्षस्याप्रामाण्यापत्तिरित्यत्राप्रत्यक्षस्येति नञ्प्रश्लेषेण अप्रत्यक्षस्येत्यस्यानी
न्द्रियस्य गुरुत्वादित्यर्थः अप्रामाण्यापत्तिः न प्रमाणं यस्मिन्नित्यप्रमाणं तत्वापत्तिः असत्वापत्तिरित्यर्थः प्रामाण्यस्य सत्वस्य अनुमेयत्वा हेरंब·
त् अनुमानाधीनत्वात् स्वतःप्रमाणं विनैव प्रामाण्यग्रहे प्रामाण्यस्य सत्वस्य ग्रहे तत्संशयानुपपत्तेः कुत्रापि सत्वसंशयो न स्यात्

सर्वत्रैवसत्वांगीकारस्यकर्तुमशक्यतया भावकोटेरेवप्रसिद्धत्वादितिभाव इति सूत्रार्थः अन्येतुप्रत्यक्षेणवानुमानेनापिनिर्विकल्पकजन
नेबाधकाभावः प्रत्यक्षमेवतत्रकारणंनानुमानमपि तत्रविनिगमकस्यवक्तुमशक्यत्वात्प्रत्यक्षाद्युत्तरज्ञानेनतद्व्यक्तितत्प्रकारकत्वरूप-
प्रामाण्यंभेदेनधर्मधर्मिभावःसतोनानादेशकालवृत्तितंव्यवस्थापयितुंपरमवशिष्यतेतत्त्वसंवादिप्रवृत्तिजनकत्वेनगवादेर्गवाद्यधि
करणतायत्यासोपमितिप्रत्यभिज्ञापाचसिद्धः नचवनदपिसर्वमस्तदेवा सर्वानुभवसिद्धस्यदृष्टान्तरदोषांचिनाप्यप्रामाणिकत्वेसततोप्य
सत्वापत्तेरित्याहुः वस्तुतस्तु अनुमितेर्नोत्पत्तौ स्वनुभावादिसिद्धायाविज्ञानीयप्रमाया दुरपह्नवत्वात्तत्करणतयानुमानप्रमाणांतरमवश्यं
वाच्यमित्यस्यदीधितिकारेणपरामर्शग्रंथेवक्तव्यतयातत्रनिर्विकल्पकस्येत्यादिक्रमायनतएवोक्तंनिर्भरस्कतेत्रेवः तच्चतत्रैवविवेचयि
ष्यामः <u>इतिमहादेवविरचितेभवानंदीप्रकाशेअनुमानप्रामाण्यकाण्डः</u> नत्वापदांभोजयुगंशिवस्यस्मृत्वागुरूक्ताखिलयुक्तिजातं। हृत्साति
दृष्टार्थविभावनांव्याख्यायतेव्याप्तिरहस्यमत्र १ ननु अनुमानप्रामाण्यव्यवस्थानिर्वाहकोव्याप्तिग्रहोपाय एवकथनार्होनतुव्या
प्तिस्वरूपंकथनार्हंप्रयोजनाभावादितिनन्वित्यादिनाव्याप्तिस्वरूपनिरूपणारंभणंव्यर्थं। नचानुमितिलक्षणघटकतयाव्या
प्तिस्वरूपंकथनार्हमेवेतिवाच्यं। यांकांचिदित्याद्यनुमितिलक्षणस्यैवनिष्कृष्टतयाव्याप्तिस्वरूपस्यतदघटकत्वात्। अतएवप्रकृ
तानुमितिलक्षणघटकत्वरूपोयोद्धातसंगत्यानुमितिनिरूपणानंतरंव्याप्तिनिरूपणमारभतेनन्वित्यादिनेत्यवतारणमपिनिरस्त

मित्याशंकानिरासाय दीधितौ समारब्धेत्यादिकं अनुमितिलक्षणोपोद्घातसंगत्या व्याप्तिनिरूपणं किंत्वव्यवहितनिरूपितानुमा
नप्रामाण्योपोद्घातसंगत्या तन्निरूपणमित्यभिप्रायकेनन्वित्यादिग्रंथावतारणं तदुक्ताशंकानिरासार्थं। कुत्ते नव्याकरोतिसमार
ब्धायेत्यादि। व्याप्तिस्वरूपज्ञाने हीतिसतिसप्तमी एतस्य प्रतिपादयितुं शक्यते दूषणेनान्वयः तथा चानुमानप्रामाण्यव्यवस्थानि
र्वाहकव्याप्तिग्रहोपायनिरूपणायोपजीव्यत्वेन प्रथमं व्याप्तिस्वरूपनिरूपणमितिभावः। नन्वेवं नन्वनुमितिहेतुज्ञानप्रतिमूले व्या
प्तिग्रहस्यानुमितिहेतुत्वोपदर्शनासंगतिरिति वाच्यं तदुपदर्शनं विना व्याप्तिग्रहोपायप्रतिपादनस्यानुमानप्रामाण्यपरीक्षाका
रणत्वानुपपत्तेः तदुपदर्शने